ISSN-2277-6443

# विद्यारश्मिः

## राष्ट्रियवार्षिकशोधपत्रिका

## Annual National Research Journal

2016

योऽनूचानः स नो महान्।

राष्ट्रियसंस्कृतसंस्थानम्



राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
NAAC द्वारा A श्रेण्यां प्रमाणितम्
(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)
क.जे.सोमैया-संस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई-77

Scanned with OKEN Scanner

ISSN-2277-6443

# विद्यारश्मि:

## राष्ट्रियवार्षिकशोधपत्रिका

## Annual National Research Journal
2016

वेदर्चामर्चयन्तस्स्मृतिचयवचनं तत्त्वतश्चर्चयन्त:
शास्त्रान्त:संस्पृशन्तोऽमृतगतिमतिदं दर्शनं दर्शयन्त: ।
साहित्यं स्वादयन्तस्सहृदयवसती भासमुद्भासयन्तो
विद्याया रश्मयो ज्ञान् पिपुरतु सुधियां शेमुषीमेधयन्त: ॥

**प्रधानसम्पादक:**

प्रो. एम्. चन्द्रशेखर:
प्राचार्य्य:

**सम्पादका:**

प्रो. प्रकाशचन्द्र:
प्रो. मदनमोहनझा:
डा. नारायणन्. ई. आर्.
प्रो. ई. एम्. राजन्
प्रो. बोधकुमारझा:
डा. ( श्रीमती ) गीता दुबे

राष्ट्रियसंस्कृतसंस्थानम् ( मानितविश्वविद्यालय: )
NAAC द्वारा 'A' श्रेण्यां प्रत्यायितम्
( भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम् )
क. जे. सोमैयासंस्कृतविद्यापीठम्, विद्याविहार:, मुम्बई - ७७

Scanned with OKEN Scanner

© प्रकाशकाधीनः

प्रकाशकम् राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
NAAC द्वारा 'A' श्रेण्यां प्रत्यायितम्
(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)

प्रकाशनवर्षम् 2016

अङ्कः पञ्चमः

प्रधानसम्पादकः प्रो. एम्. चन्द्रशेखरः, प्राचार्य्यः

सम्पादकमण्डलम् प्रो. प्रकाशचन्द्रः
प्रो. ई. एम्. राजन्
प्रो. मदनमोहनझाः
प्रो. बोधकुमारझाः
डा. नारायणन्. ई. आर्.
डा. (श्रीमती) गीतादुबे

पत्रिकाप्रतिरूपाणि 200

मुद्रकः वन्दना आर्ट्स्, मुम्बई ।

अवधातव्यम् पत्रिकायाममुष्यां प्रकाशितलेखानां मौलिकत्वस्य तत्रत्यप्रतिपादितविचारस्य च कृते समग्रमुत्तरदायित्वं पत्रलेखकानामेव, न तु प्रकाशकस्य, सम्पादकस्य वेति स्पष्टं विज्ञप्यते ।

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
NAAC द्वारा 'A' श्रेण्यां प्रत्यायितम्
(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)
क. जे. सोमैयासंस्कृतविद्यापीठम्, विद्याविहारः, मुम्बई - ७७

प्रो. पी.एन्. शास्त्री
कुलपति
राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
('ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं
प्रत्यायन परिषद् द्वारा मान्यता प्राप्त)

Prof. P.N. Shastry
Vice-Chancellor
RASHTRIYA SANSKRIT SANSTHAN
Deemed to be University
(Under MHRD, Govt. of India)
(Accredited by NAAC with 'A' Grade)



RSkS/VC/Msg/2015-16/419

Date 02.03.2016

# सन्देशः

**"भूत्यै जागरणम्। अभूत्यै स्वपनम्।"**

जगदिदं प्रतिक्षणं परिवर्तते। गतिशीलं जीवनं नवं पन्थानम् अन्विषति। प्राक्तनं संशोध्य परिष्कृतं नूतनम् अवाप्तुं कांक्षति मनः। मानवस्य आकांक्षा संशोधिता नितरां फलति। जिज्ञासुः नरः विद्यया आत्मानं रक्षति। शिक्षितो जनः ज्ञानामृतं पिपासुः अध्ययनेन वर्धते। अत्र दिशि राष्ट्रियसंस्कृतसंस्थानस्य मुम्बईस्थः सोमैयापरिसरः "विद्यारश्मिः" इत्याख्यां शोधपत्रिकां प्रकाशयतीति ज्ञात्वा भृशं तुष्यति मे चेतः। आचार्याणां शोधलेखाः छात्राणाञ्च लेखाः पत्रिकाम् इमां भूषयन्तीति मन्ये। सेऽयं पत्रिका "विद्यारश्मिः" श्रेयसे कल्पताम् इति कामये।

प्रधानसम्पादकप्रभृतिभ्यः सर्वेभ्यः विद्यारश्मिपरिवारस्य सदस्येभ्यः शुभः स्यात् सन्देशः।

शोधपत्रिकाप्रियः
भावत्कः
(पी.एन. शास्त्री)
कुलपतिः

56-57, Institutional Area, Janakpuri, New Delhi-110058 Ph.: (O) 28523949 (Fax) 28521948
EPABX : 28524993, 28521994, 28524995 E.Mail : rskspvc@yahoo.com

# भावपुष्पम्

विद्या भगवती नराणां रूपत्वेन, प्रच्छन्नगुप्तधनत्वेन, भोगकरीत्वेन, यशःसुखकरीत्वेन गुरूणां गुरुत्वेन, देशान्तरेऽपि बन्धुजनत्वेन, परदेवतात्वेन, सर्व्वैः पूज्यत्वेन, मानवत्वसम्पादकत्वेन च नो कस्योपास्येयं निखिले जगतीतले । बालो रोदिति सत्यां बुभुक्षायां तत्र विद्यैव हेतुः । कान्तः कान्तां कामयते प्रकामं तस्मिन् विद्यैव कारणम्। गुरुः शिष्यं शास्ति स्वपुत्रस्येवेत्यत्र विद्यैव निमित्तम् । भक्तो भगवन्तं वश्यं करोति कारणं विद्यैव तत्र । किं बहुना, पृथिव्याः या क्षान्तिः, वायोः यद् वानम्, वह्नेर्यद् द्योतकतादि, नभसो विभुत्वम्, अपां स्निग्धः स्पर्शः, कालस्य यदाश्रयत्वम्, तत्र सर्वत्रैव प्रयोजकत्वं विद्याया एवेति विद्यावतां न तिरोहितन्तावत् । जन्मन आरभ्य आमृत्यु जनो महत्त्वादस्माद् विद्यामेवानुगच्छति, विद्यामेवाश्रयति, विद्यामेव चावाप्य मृत्युं तरति । सेयं विद्या भगवती प्रसन्ना सती यदा लोकं प्रसादयितुं वाञ्छति तदा तस्याः कश्चन रश्मिरुदेति । सोऽयञ्च रश्मिः व्याप्तं तमः सारयति, तृषितान् तर्पयति, पिपासितान् पाययति, बुभुत्सितांश्च बोधयति । तादृश एव कश्चन रश्मी राष्ट्रियवार्षिकशोधपत्रिका 'विद्यारश्मिः' इति नाम्ना विश्रुता विद्वज्जनैर्नैकवर्षेभ्यः समादृता स्वस्या इव स्वयमेव या, ततः सद्य उत्पन्नः सन् वर्षे तत्रभवताम्भवताम्पुरस्तादुपस्थितो विदुषां शोधार्थिनाञ्च मनो मोदयितुमुत्सहते, समुत्सहते चास्माकं हृदयं नैवेद्यमिदमावण्टयितुं भवत्सु ।

दिग्दिगन्ते संस्कृतस्य ध्वजमुद्दोलयितुं गृहीतावधृतप्रतिज्ञं नवदेहलीस्थं राष्ट्रियसंस्कृतसंस्थानं विविधविधयोजनायोजनेन संस्कृतभाषां, संस्कृतशास्त्रं, संस्कृतशोधादिकञ्च स्वयं प्रोन्नयते, समग्रे राष्ट्रे प्रसृतपरिसरद्वारा प्रोन्नाययति चेति रीत्या मुम्बईस्थेन क. जे. सोमैयासंस्कृतविद्यापीठेन प्रतिवर्षमेषा पत्रिका निजगुणगौरवगर्भिताऽपि प्रकाश्यते । अस्मिन् सारस्वतोपक्रमे संस्थानस्य कुलपतय आचार्य्यपरमेश्वरनारायणशास्त्रिवर्य्याः, सोमनाथसंस्कृत-विश्वविद्यालयस्य कुलपतय आचार्य्यार्कनाथचौधरीमहोदयाः, श्रीलालबहादुरशास्त्रिसंस्कृतविश्वविद्यालयस्य कुलपतय आचार्य्यरमेशकुमारपाण्डेयमहाशयाः, जगन्नाथसंस्कृतविश्वविद्यालयस्य कुलपतय आचार्य्यगङ्गाधरपण्डामहाभावाः स्वस्वाशीर्वाक्कुसुमैः सनाथीकृतपत्रिकाः परिसरप्राचार्य्यसमितसम्पादकानां नूनं महान्तमुपकारमकार्षुरिति भूयो भूयो भावयामः ।

संस्कृतहिन्द्याङ्ग्लभाषात्रयेणोद्भासितायां शोधपत्रिकायाममुष्याम् अष्टत्रिंशत्संख्याकान् धीरधिषणयोपनिबद्धान् निबन्धान् प्रदाय रश्मौ रश्मित्वसाधकान् विदुषः शोधार्थिनश्च वयमाभारवाचा संस्तुमः, प्रस्तुमश्च परिसरप्राचार्य्याणामाचार्य्याणाम् एम्. चन्द्रशेखरमहानुभावानां कृते कार्तज्ञभावान्, येषां प्रदत्तसकलसौविध्येन पत्रिकेयं प्रकाशतां गता । अथ चान्ते पत्रिकाया अस्या विन्यसने, प्रबन्धने च जातायै मानवसुलभायै त्रुटये सुविनम्रभावेन भवतामौदार्य्यं विश्वसिमः, आत्मानं च तस्मादाश्वसिमः ।

छिद्यादन्धतमो रश्मिर्भिद्याद् भेदं भयप्रदम् ।
विद्याद्विद्या च मेदिन्यां खिद्येताथ न लेखनी ॥

सम्पादकाः

Scanned with OKEN Scanner

# शोधपत्रविषयक्रमः पृष्ठाङ्कनिर्देशश्च


| क्र. सं. | विषयः | लेखकः | पृष्ठाङ्कः |
|---|---|---|---|
| 1 | पालिसाहित्यपरिप्रेक्ष्ये पारमिता (एकं विश्लेषणम्) | प्रो. एम्. चन्द्रशेखरः | 1 |
| 2 | संस्कृताध्यापकानां व्यक्तित्वविकासः, उपायाश्च | प्रो. लोकमान्यमिश्रः | 8 |
| 3 | अपभ्रंशेषु शक्तिविचारः | प्रो. प्रकाशचन्द्रः | 17 |
| 4 | ध्वन्यालोकस्थध्वनिलक्षणकारिकाविवेकः | प्रो. ई. एम्. राजन् | 27 |
| 5 | शिक्षामनोविज्ञानस्य प्रयोगविधिः | प्रो. मदनमोहनझाः | 31 |
| 6 | शिवतत्त्वस्य स्फोटतत्त्वस्य चाभेदः | प्रो. बोधकुमारझाः | 40 |
| 7 | सूत्रक्रमानुसारिणी व्याकरणशिक्षणपद्धतिः | डा. देवदत्तसरोदे | 48 |
| 8 | भारतीयसंविधानस्य मूलावधारणानां विश्लेषणं समालोचनञ्च | डा. वी. एस्. वी. भास्कररेड्डी | 58 |
| 9 | Variations in the Sanskrit & the English Grammer Systems | Dr. Narayanan E. R. | 71 |
| 10 | व्याकरणशास्त्रदृष्ट्या वाचनाभिव्यक्त्योर्भाषामनोविज्ञानम् | डा. गायत्रीमुरलीकृष्णः | 75 |
| 11 | वेदव्याख्या में निरुक्तकार का अवदान | डा. जयप्रकाश नारायण | 81 |
| 12 | प्रश्नप्रकरणप्रेरकवैविध्यकौशलयोः वैशिष्ट्यम् | डा. सच्चिदानन्दमूर्तिः | 89 |
| 13 | सुमुहूर्त्तनामकरणवैशिष्ट्यम् | डा. जयकृष्णन् नम्पूतिरि एन्. डि. | 98 |
| 14 | वास्तुशास्त्रे मुहूर्त्तविचारः | डा. विष्णुकुमारनिर्मलः | 108 |
| 15 | राधाचरितमहाकाव्यसमीक्षा | डा. स्वर्गकुमारमिश्रः | 113 |
| 16 | हिन्दी वाङ्मय में संस्कृत वाङ्मय का प्रभाव | डा. संजय कुमार मिश्र | 124 |
| 17 | वृत्तिस्वरूपविमर्शः | डा. मनमोहनतिवारी | 130 |
| 18 | एकविंशशताब्द्यां दूरशिक्षा | डा. सीतारामशर्मा | 134 |
| 19 | काव्य का शाश्वत प्रयोजन 'परोपकार' | डा. राजेशकुमारशुक्ल | 144 |
| 20 | Dramatic Purpose of Supernatural interventions in the plays of Kalidasa and Shakespeare | Dr. Shweta Sood | 152 |


Scanned with OKEN Scanner

| | | | |
|---|---|---|---|
| 21 | वृत्तिविमर्शः | डा. माधवदत्तपाण्डेयः | 160 |
| 22 | समासवृत्तिविमर्शः | डा. नवीनकुमारमिश्रः | 165 |
| 23 | विवाह में मेलापक विचार | डा. सुभाषचन्द्र मिश्र | 172 |
| 24 | शुभाशुभशकुन निर्णय | डा. आशीष कुमार चौधरी | 183 |
| 25 | वक्रोक्तिविमर्शः | डा. राकेशकुमारजैनः | 192 |
| 26 | संस्कृत एवं हिन्दी साहित्य के आधार पर रामचरितमानस में रसविचार | डा. (श्रीमती) गीतादेवी दूबे | 198 |
| 27 | शिक्षकस्य व्यक्तित्वं वैयवसायिक-क्षमतोन्नयनहेतुः | डा. कुमारः | 208 |
| 28 | लक्षणा तेन षड्विधा | डा. एम्. सुदर्शनचिपळूणकरः | 213 |
| 29 | A Comparative Study of Kalidasa's Abijnanasakuntalam and Shakespeare's – The tempest | Dr. Suman Singh | 216 |
| 30 | शिक्षक में सामाजिक दृष्टिकोण | डा. सुनील कुमार शर्मा | 223 |
| 31 | वेधशालायाः परिचयः | श्रीविजयानन्दः अडिगः | 230 |
| 32 | मराठीभाषाविज्ञाने वृत्तिविमर्शः | सुरेश चेमटे | 235 |
| 33 | परम्परानुरूपसूत्रवृत्तिस्वरूपविमर्शः | सुश्रीः मौनिका बोल्ला | 241 |
| 34 | सभ्याभरणे समर्थसूत्रवृत्तिविचारः | एल्. सविता आर्या | 248 |
| 35 | Relation Between English & Sanskrit Literature | Trupti Mohanta | 252 |
| 36 | विवाहे मेलापकस्य महत्त्वम् | नूतानी ग्रहाचार्य | 268 |
| 37 | शब्दार्थसम्बन्धस्वरूप | महात्मा वीणापाणि त्रिपाठी | 275 |
| 38 | परमलघुमञ्जूषानुसारं लक्षणाखण्डनविमर्शः | ऋतम्भरा पाण्डेय | 281 |


❖❖❖

Scanned with OKEN Scanner

# अपभ्रंशेषु शक्तिविचारः

✍प्रो. प्रकाशचन्द्रः

(पातञ्जलेन जलेन अभ्युक्ष्य वाक्यपदीयविटपच्छायामाश्रित्य भूषणमञ्जूषादिक-मुद्घाट्यापभ्रंशेषु शक्तिर्वा न वा ? यद्यस्ति तत्कुतः ? नास्ति चेत् कुतः? इत्यादिविचारपरोऽयं निबन्धो विचारकान् नूनं केनचिन्नवेन विचारबन्धनेनाबध्नाति । वस्तुतः शक्तिः व्यवहारप्रमाणा । स च व्यवहारः अपभ्रंशेषु शक्तिं साधयति । शक्तिग्राहकेषु व्यवहारोऽनितरसाधारणः । तद्बलेन निबन्धेनानेन वैयाकरणसिद्धान्तं युक्तियुक्तं प्रतिपादयन्तः आचार्याः भाषिकशक्तिं विन्यस्य 'एकः शब्दः सम्यग्ज्ञातः' इत्युद्धरन्तः कामपि लोकोत्तरां शब्दशक्तिमपि सङ्केतयन्ति ।)

सर्वोऽपि लोकव्यवहारः शब्दाश्रितः । शब्दश्च स्वार्थेन सहैव व्यवहारयोग्यो भवति । अर्थं विना शब्दप्रयोगो न सम्भवति । तयोः शब्दार्थयोः स्वाभाविकः कश्चन सम्बन्धो भवति यश्च प्रयोगदृष्ट्या परम्परया तयोः नित्यत्वेनावतिष्ठते ।

शब्दस्य नित्यत्ववाचकत्वविषये 'सिद्धे शब्दार्थसम्बन्धे' इति वार्तिकव्याख्याप्रसङ्गे भाष्यकारः कथयति 'कथं पुनर्ज्ञायते सिद्धः शब्दोऽर्थः सम्बन्धश्चेति, लोकतः । यल्लोकेऽर्थमर्थमुपादाय शब्दान्प्रयुञ्जते, नैषां निर्वृत्तौ यत्नं कुर्वन्ति ॥'[1] स्वं रूपम् इति सूत्रेऽपि भाष्यकारः कथयति – 'शब्देनोच्चारितेनार्थो गम्यते'[2]

अत्र कैयटः कथयति 'इह योग्यतालक्षणेन सम्बन्धेन शब्दोऽर्थं लोके प्रत्याययति ।'[3] एतत्कैयटकथनं वाक्यपदीयमतानुसारि विद्यते यथोक्तं तत्र भर्तृहरिणा

**'इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता' यथा ।**
**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ॥**[4]

अर्थाद् यथा चक्षुरादीनामिन्द्रियाणां रूपादिविषये ग्राहकता शक्तिरनादियोग्यता युक्ता स्वतः सिद्धा भवति तथैव शब्दानामर्थैः सहानादिर्योग्यता स्वाभाविकी शक्तिर्भवति यया उच्चारितमात्रादर्थप्रत्ययः सम्भवति ।

अत्र हेलाराजो भाष्यप्रमाणप्रस्तुतिपूर्वकं कथयति 'समवायादिनिमित्तानपेक्षयै-वोच्चारितमात्राच्छब्दादर्थप्रत्ययोत्पत्तेरकृत्रिमा शक्तिरवसीयते ।' अर्थमात्रेण हि शब्दमात्रस्या-

वियोगमप्रवृत्तसंकेता अपि प्रतिपद्यन्ते । तथा योग्यता स्वाभाविकी सिद्धा संकेतस्तु तामेव द्योतयति । तद्यथा चक्षुरादीनां रूपादिविषये पुरुषप्रयत्नानपेक्षया ग्राहकता । न हि यत्नेनापि रूपे रसननिवेशः शक्यक्रियः । एवं गवार्थे घटशब्दनिवेशोऽसाधुः । तथा हि भाष्यम् 'यो हि गामश्व इति ब्रूयान्न जातुचित् संप्रत्ययः स्यात्' इति ।[5] (म. भा. सू. 1/2/64)

हेलाराजोद्धृतं भाष्यवचनं शब्दार्थयोरनादियोग्यतासम्बन्धं स्पष्टं निर्दिशति अर्थात् वाक्यपदीयकारमतं भाष्यसम्मतमेव विद्यते ।

काशिकाकारः समर्थः पदविधिः इति सूत्रे समर्थपदं शक्त्याश्रयबोधकं विद्यत इति स्वीकृत्य कथयति 'समर्थः शक्तः । विग्रहवाक्यार्थाभिधाने यः शक्तः स समर्थो वेदितव्यः ।'[6] तत्र न्यासकारः काशिकाशयं स्पष्टयन् निगदति 'समर्थः शक्त इति । स्वकार्यनिर्वर्तनक्षम इत्यर्थः । स हि लोके समर्थ इत्युच्यते । स्वार्थप्रतिपादनमेव शब्दानां स्वकार्यम् । ये चेह लौकिका वैदिकाश्च शब्दा अधिकृतास्ते सर्वे एव स्वकार्यप्रतिपादनं प्रति समर्थाः ।'[7]

तदेवं शब्दार्थयोरनादिसम्बन्धात्मिका योग्यतैव शक्तिपदवाच्या भवति भाष्यवाक्य-पदीयादिप्रमाणेन । परवर्तिभिश्च आचार्यैर्भट्टोजिदीक्षितकौण्डभट्ट नागेशभट्टादिभिश्च स्वस्वग्रन्थेषु शब्दशक्तिविषयो भाष्यादिप्रमाणेन विस्तरेण, आंशिक मतभेदपूर्वकं, विवेचितः । मीमांसकनैयायिकादीनां च मतानि तैः समीक्षितानि ।

अस्मिन् सन्दर्भेऽयमपि विषयो विस्तरेण शब्दशास्त्रे विचारितो दृश्यते यत् सा शक्तिः यथा साधुशब्देषु व्याकरणसिद्धशब्देषु भवति तथैव किमपभ्रंशेषु अपशब्देषु असाधुशब्देषु च भवति न वा?

पत्रस्यास्य मुख्यप्रतिपयाद्यविषयोऽस्ति अपभ्रंशेषु शक्तिविचारः ।

## अपभ्रंशस्वरूपम्

संस्कृतादपभ्रश्यति तस्मात् अपभ्रंशः । भ्रंशु अधःपतने इति धातोः पचाद्यचि अपभ्रंशो भवति स एव अपशब्दः । अर्थात् अपभ्रष्टशब्दोऽपशब्दः । द्वे व्याकरणानिष्पन्नस्य गावीत्यादेः।[8]

महाभाष्ये उभयोः शब्दयोः प्रयोगो दृश्यते, यथा भूयांसो ह्यपशब्दा अल्पीयांसः शब्दाः। एकैकस्य शब्दस्य बहवोऽपभ्रंशाः । तद्यथा गावी गोणी गोता

गोपोतलिकेत्येवमादयोऽपभ्रंशाः ।[9] विषयोऽयं भर्तृहरिणा विस्तरेण विचारितः । यथा वाक्यपदीयकारिकाऽस्ति

'शब्दः संस्कारहीनो यो गौरिति प्रयुयुक्षिते ।
तमपभ्रंशमिच्छन्ति विशिष्टार्थनिवेशिनम् ॥'[10]

कारिकाभिप्रायं मतत्रयप्रतिपादनपुरस्सरं स्पष्टयन् कथयति स्वोपज्ञवृत्तौ हरिवृषभः

'शब्दप्रकृतिरपभ्रंश इति संग्रहकारः ।
नाप्रकृतिरपभ्रंशः स्वतन्त्रः कश्चिद् विद्यते ॥'

सर्वस्यैव हि साधुरेवाभ्रंशस्य प्रकृतिः । प्रसिद्धेस्तु रूढितामापद्यमानाः स्वातन्त्र्यमेव केचिदपभ्रंशा लभन्ते । तत्र गौरिति प्रयोक्तव्येऽशक्त्या प्रमादादिभिर्वा गाव्यादय-स्तत्प्रकृतयोऽपभ्रंशाः प्रयुज्यन्ते । ते च सास्नादिमत्येव लब्धस्वरूपाः साधुत्वं विजहति । अर्थान्तरे तु प्रयुज्यमानाः साधव एव विज्ञायन्ते । न ह्येतेषां रूपमात्रप्रतिबद्धमसाधुत्वम् ।[11]

अस्मिन् सन्दर्भे अग्रिमाः तिस्रः कारिका अपि द्रष्टव्याः

अस्वगोण्यादयः शब्दाः साधवो विषयान्तरे ।
निमित्तभेदात् सर्वत्र साधुत्वं च व्यवस्थितम् ॥
ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः ।
तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः ।
न शिष्टैरनुगम्यन्ते पर्याया इव साधवः ।
ते यतः स्मृतिशास्त्रेण तस्मात् साक्षादवाचकाः ॥[12]

## अपभ्रंशेषु शक्तिविचारः

लोकव्यवहाराय लोके विविधाश्शब्दाः प्रयुज्यन्ते किन्तु सर्वे जनाः सर्वान् शब्दान् तेषामर्थांश्च न जानन्ति ज्ञातुं वा शक्नुवन्ति । यतो हि लोके एक एव शब्दः देशादिभेदकारणात् पृथक्पृथगर्थाभिधायी भवति यथा भाष्यकारो निगदति 'एतस्मिंश्चातिमहति शब्दस्य प्रयोगविषये ते ते शब्दास्तत्र तत्र नियतविषया दृश्यन्ते । तद्यथा शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति । विकार एनमार्या भाषन्ते शव इति ।' हम्मतिः सुराष्ट्रेषु, रंहतिः प्राच्यमध्येषु, गमिमेव त्वार्या प्रयुञ्जते ।[13] दातिर्लवनार्थे प्राच्येषु दात्रमुदीच्येषु यथा लोके शब्दा देशादिभेदनिमित्ताद् भिन्नभिन्नार्थेषु प्रयुज्यन्ते तथैव तेषां शब्दानामर्थात् साधुशब्दानामपभ्रंशा अपि

तेषु तेष्वर्थेषु प्रयुज्जाना दृश्यन्ते । देशान्तरे च अन्येष्वर्थेषु अपि प्रयुज्यन्ते, यथाभाष्यविवेचनेन ज्ञातुं शक्यते।

अपभ्रंशेष्वपि सा योग्यतालक्षणा शब्दार्थसम्बन्धात्मिका शक्तिः शब्देष्विव भवति न वेति शास्त्रकारैः विषयो विस्तरेण विचारितो विद्यते ।

यथा महाभाष्यकारः शब्दोपदेशप्रसङ्गे प्रश्नोत्तरमाध्यमेन कथयति, 'शब्दानुशासनमिदानीं कर्तव्यम् । तत्कथं कर्तव्यम् ? किं शब्दोपदेशः कर्तव्यः, आहोस्विदपशब्दोपदेश इति । किं पुनरत्र ज्यायः लघुत्वाच्छब्दोपदेशः । लघीयाञ्छब्दोपदेशः गरीयानपशब्दोपदेशः । एकैकस्यापि शब्दस्य बहवोऽभ्रंशाः । तद्यथा गौरित्यस्य शब्दस्य गावी गोणी गोता गोपोतलिकेत्येवमादयोऽपभ्रंशा । इष्टान्वाख्यनमपि भवति ।'[14] इष्टेति साधुशब्दप्रयोगाद् धर्मावाप्तेरित्यर्थ इति कैयटः ।[15] अग्रे तत्रैव भाष्यकारः निर्दिशति 'समानायामर्थावगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते शब्देनैवार्थोऽभिधेयो नापशब्देनेति । एवं क्रियमाणमभ्युदयकारि भवति ।'[16]

आचार्यभर्तृहरिः अस्मिन् विषये स्पष्टं कथयति

**'शिष्टेभ्य आगमात् सिद्धाः साधवो धर्मसाधनम् ।**
**अर्थप्रत्ययनाभेदे विपरीतास्त्वसाधवः ।'[१७]**

अर्थात् शिष्टेभ्यः पाणिन्यादिभ्यः सम्प्राप्ताद् व्याकरणात् सिद्धाः साधवः साधुशब्दा धर्मसाधनभूता अभ्युदयकारिणो भवन्ति । अन्ये तद्विपरीतास्त्वसाधवो साधुशब्देभ्योऽर्थवैलक्षण्ये सत्यपि न धर्मसाधनम् । अर्थप्रत्ययस्तु उभाभ्यां साध्वसाधुशब्देभ्योऽर्थवैलक्षण्ये सत्यपि न धर्मसाधनम् । अर्थप्रत्ययस्तु उभाभ्यां साध्वसाधुशब्दाभ्यां समानरूपेण भवति अर्थादर्थबोधिका शक्तिरुभयविधशब्दापशब्देषु भवति, किन्तु अभ्युदयार्थिभिः साधुशब्दैरेव व्यवहर्तव्यम् । यथा तत्रैव वाक्यपदीये निगदति -

**यथैषां तत्र सामर्थ्यं धर्मेऽप्येव प्रतीयताम् ।**
**साधूनां साधुभिस्तस्माद् वाच्यमभ्युदयार्थिनाम् ।।[१८]**

कारिकाशयं स्पष्टयति वृत्तिकारः यथा - 'सन्ति चेह दृष्टफलाः कश्चित् प्रतिशब्दं शक्तय इत्यागमादवसीयते । सत्यागमे साधूनामपि तथैवावसीयतां धर्मसाधनत्वमित्यतोऽभ्युदयार्थिभिरनतिशङ्कनीयां स्मृतिमविच्छिन्नशिष्टसमाचारां परिगृह्य व्यवहारे साधव



Scanned with OKEN Scanner

एव शब्दाः प्रयोक्तव्याः ।"[19] (स्वोपज्ञवृत्तिः वा. प. 1/139) अनेन भाष्यवाक्यपदीयादिनिर्देशेन स्पष्टतया ज्ञातुं शक्यते यच्छब्दापशब्दयोः उभयोरपि समानरूपेणार्थबोधिका शब्दशक्तिर्भवति तदनु अन्ये वैयाकरणा अपि अपभ्रंशेषु शक्तिं स्वीकुर्वन्तः स्वग्रन्थेषु अमुं विषयं युक्तिप्रमाणाभ्यां चर्चितवन्तः ।

**नैयायिकमतम्**

नैयायिका 'ईश्वरेच्छां शक्तित्वेन' मन्यमानाः केवलं साधुशब्देष्वेव शक्तिं मन्यन्ते यतो हि ते 'ईश्वरसंकेतमेव' शक्तित्वेनाङ्गीकुर्वन्ति । न च ईश्वरः कदापि अपशब्दात्मिकामिच्छां कर्तुं प्रभवति । तेषां मते असाधुशब्दैर्यज्ज्ञानं भवति तत् साधुशब्दभ्रमात् साधुशब्दस्मरणाद् वा भवति यथोक्तं न्यायमञ्जर्यां गवादय एव वाचकशक्तेराश्रयो न गाव्यादयः, ....... नैयायिकानां समयः प्रतिपत्त्युपायः स त्वीश्वरप्रणीतः प्रथमसर्गात् प्रवृत्तौ मीमांसकाभ्युपगतनैसर्गिक शक्तिसोदर्य एव न मादृशरचितपरिमितविषयसमयसमानः, स च गवादिशब्देष्वेव प्राप्तप्रतिष्ठो न गाव्यादिषु, ते तु वर्णसारूप्यच्छायया गवादिशब्दस्मृतिमादधानास्तदर्थप्रतिपत्तिहेतुतामुगच्छन्तीति।[20]

**नैयायिकमतप्रत्याख्यानम्**

वैयाकरणकौण्डभट्टः वैयाकरणभूषणसारे नैयायिकमतं युक्तिपूर्वकमस्वीकुर्वन् कथयति 'अपभ्रंशानामशक्तत्वे ततो बोध एव न स्यात् । न च साधुस्मरणात्ततो बोधः तानविदुषां पामराणामपि बोधात् तेषां साधोरबोधाच्च ।'[21]

कौण्डभट्टमनुकुर्वन् वैयाकरणनागेशभट्टोऽपि नैयायिकमतं प्रायः समानयुक्तिभिर्निराकुर्वन् नैयायिकमतप्रतिपादनपुरस्सरं परमलघुमञ्जूषायां कथयति 'यत्तु तार्किका असाधुशब्देन साधुस्मरणद्वाराऽर्थबोध इत्याहुः । तन्न, साधुस्मरणं विनाऽपि बोधानुभवात् । तद्वाचकसाधुशब्दमजानतां बोधानापत्तेश्च' [22] अर्थात् साधुशब्दस्य स्मरणं विनाऽपि गाव्यादिभिः असाधुभिरपशब्दैरपि लोके गवादिसाधुशब्दार्थस्य बोधो दृश्यते, अथ च ये साधुशब्दान् न जानन्ति तेषामपि बोधो न स्याद् यदि साधुशब्दस्मरणेन बोधः स्वीक्रियते । अपि च शक्तिभ्रमादपि असाधुशब्देषु बोधशक्तिर्नैव स्वीकर्तुं शक्यत यथा निगदति मञ्जूषाकारः 'न च शक्तिभ्रमाद् बोधोऽसाधुशब्देष्विति वाच्यम् निस्स्न्देहप्रत्ययस्य बाधकं विना भ्रमत्वायोगात् । अत एव स्त्रीशूद्रबालादीनामुच्चारिते साधावर्थसंशये तदभ्रंशेनार्थनिर्णयः'[23] अर्थादसाधुशब्देषु

साधुशब्दानां शक्तिभ्रमाद् बोधो भवतीति नैयायिकमतमपि न्यायसंगतं नास्ति यतो हि भ्रमः तत्रैव भवितुमर्हति यत्र सन्देहः स्यात्, किन्तु यत्र सन्देहो नास्ति तत्र भ्रमोऽपि न सम्भवति । सन्देहाभावादेव अपभ्रंशा अपशब्दा असाधुशब्दाश्च अर्थबोधनपूर्वकं लोके प्रयुक्ता दृश्यन्ते । अथ च तत्र भ्रमत्वायोगादेव कदाचित् साधुशब्दोच्चारिते स्त्रीशूद्रबालादीनामर्थसंशये अर्थविषयके सन्देहे उत्पन्ने सति तदभ्रंशेन साधुशब्दस्याभ्रंशशब्दोच्चारणेन अर्थनिश्चयो विधीयते ।

कौण्डभट्टनागेशयोः चिन्तनस्य मूले वाक्यपदीयस्य कारिकाद्वयं प्रमाणत्वेन द्रष्टुं शक्यते।

**एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते ।**
**तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते ॥**
**पारम्पर्यादपभ्रंशा विगुणेष्वभिधातृभिः ।**
**प्रसिद्धिमागता येषु तेषां साधुरवाचकः ॥**[24]

नागेशभट्टोऽपभ्रंशेष्वपि शक्तिः भवतीति सिद्धान्तं स्वीकर्तुं हेतुद्वयप्रस्तुतिपूर्वकं कथयति 'सा च शक्तिस्साधुष्विवाभ्रंशेष्वपि शक्तिग्राहकशिरोमणेर्व्यवहारस्य तुल्यत्वात् । व्यवहारदर्शनेन च पूर्वजन्मानुभूतशक्तिस्मरणम् । अत एव बालानां तिरश्चां चान्वयबोधः न हि तेषां तदैव तत्सम्भवः ।'[25]

अर्थात् गाव्यादिलोकप्रचलितापभ्रंशेषु तादृशी अर्थबोधिका शक्तिर्भवति यादृशी गवादिसाधुशब्देषु भवति इति स्वीकरणे कारणमस्ति लोकव्यवहारः । यथा कस्मिंश्चिद् ग्रामे गौरित्यस्य स्थाने 'गावी' इत्यादिः अपभ्रंशः प्रचलितोऽस्ति व्यवहारे तस्यैव प्रयोगः भवति तेनैव च अपभ्रंशेन सास्नादिमतः प्राण्यर्थस्य बोधोऽपि भवति । अर्थाल्लोकव्यवहारकारणात् तस्मिन्नपशब्देऽपि समाना अर्थबोधिका शक्तिः सिद्धा भवति ।

द्वितीयं कारणं वर्तते पूर्वजन्मानुभूतशक्तिस्मरणम् । अतः पूर्वजन्मानुभूतशक्तिस्मरणादेव बालानां पशुपक्षिणाञ्चान्वयबोधोऽर्थात् पदार्थसम्बन्धसामान्यज्ञानं दृश्यते, तेषामिङ्गितैर्निमिषितैः संकेतैरव्यक्तध्वनिभिश्चैतत् स्पष्टं ज्ञायते यत् तेषु पूर्वजन्मशक्तिस्मरणकारणभूता सामान्यज्ञानावस्था उद्भूता भवति न हि तत्काले एव जन्मकाले आद्यबोधकालो वा तेषां तत्सम्भवः शक्तिज्ञानसम्भवः शक्तिग्रहो न सम्भव इति भावः ।



Scanned with OKEN Scanner

एतत्कारणद्वयं भर्तृहरिणा शब्दान्तरेण पूर्वमेव निर्दिष्टमासीत् अर्थात् नागेशभट्टस्य कथनं भर्तृहरिप्रमाणसिद्धं भवति, यथोक्तं वाक्यपदीयकारेण –

**इतिकर्तव्यता लोके सर्वा शब्दव्यपाश्रया ।**

**तां पूर्वाहितसंस्कारो बालोऽपि प्रतिपद्यते ॥**[26]

अर्थात् लोके इतिकर्तव्यता इदमित्थं कर्तव्यमिति ज्ञानं शब्दाश्रितं विद्यते, शब्दश्च व्यवहाराधीनः । व्यवहारे शब्दापशब्दाः उभयविधा अपि शब्दाः प्रयुज्यन्ते । पूर्वजन्म संस्कारवशात् तामितिकर्तव्यतां बालोऽप्यस्मदादिव्यवहारं दृष्ट्वा पूर्वजन्मसंस्कारवशाच्च प्रतिपद्यते ।

अथ च प्रतिभात्मिकया शक्त्या सर्वेषु प्राणिषु इतिकर्तव्यतारूपः व्यवहारः सर्वत्र द्रष्टुं शक्यते यथा वाक्यपदीयस्य कारिकाद्वयं प्रमाणत्वेन द्रष्टुं शक्यते

**'साक्षाच्छब्देन जनितां भावनानुगमेन वा ।**

**इतिकर्तव्यतायां तां न कश्चिदतिवर्तते ॥**

**प्रमाणत्वेन तां लोके सर्वः समनुपश्यति ।'**[२७]

समारम्भाः प्रतायन्ते तिरश्चामपितद्वशात् तत्र पुण्यराजः कारिकाशयं स्पष्टयन् कथयति – 'सा साक्षाच्छब्देन कदाचित् व्यवहारकाले जन्यते जन्मान्तरभावनावशेन वा गजवाजिप्रभृतीनामपि तन्मूल एव कर्तव्यतारूप सर्वत्र व्यवहारः ।', 'सर्वः कश्चित्तामेव भगवतीं स्वप्रतिभां प्रमाणत्वेन पश्यति । तथा चोच्यते सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः इति तिरश्चां च जातमात्राणां तन्मूल एव व्यवहार इति न तदपह्नवेन आत्मा वञ्चनीयः'[28]

'तिरश्चाञ्चन्वयबोधः' इति यन्नागेशभट्टेनोक्तं तस्य तत्कथनं वाक्यपदीयानुसारि एव वर्तत इति प्रमाणत्वेन स्वीकर्तुं शक्यते ।

**मीमांसामतम्**

मीमांसादर्शने साध्वसाध्वपभ्रंशादिविषये विस्तरेण चर्चा कृता विद्यते । तेषां मते साधुशब्दे एव अनादिशक्तिर्भवति अर्थाद् अन्येषु अपभ्रंशादिषु सा अनादिशक्तिर्न भवति 'एषामेकोऽनादिरन्येऽपभ्रंशाः'[29]। अस्मिन् विषये जैमिनिसूत्रं च प्रमाणयन्ति । सूत्रमस्ति 'तदशक्तिश्चानुरूपत्वात्'[30] अर्थात् अशक्त्या असामर्थ्येन साधूनामेव तथोच्चारण-

मर्थतोऽवयवयतश्चानुरूपत्वादित्यर्थकम् । तत्र शाबरभाष्योक्तं विद्यते 'तस्माद् यमभियुक्ता उपदिशन्ति एष एव साधुः साधुरित्यवगन्तव्यः' तेषां मते अपभ्रंशेषु यद्यपि अनादिशक्तिर्न भवति तथापि ते साधुशब्दवदर्थबोधका भवन्ति, साधुशब्दार्थस्मरणं च तत्र बोधकारणं भवति । यथोक्तं दृश्यते शाबरभाष्ये 'तेन गाव्यादिभ्यः सास्नादिमानवगम्यते, अनुरूपो हि गाव्यादिर्गोशब्दस्य ।', 'गाव्यादिदर्शनाद् गोशब्दस्मरणम् । ततः सास्नादिमानवगम्यते'[30]

**निष्कर्षः**

तदेवमपभ्रंशेषु शक्तिविचारप्रसङ्गे भवेन्नाम शास्त्रकारेषु आंशिको मतभेदः किन्तु लोकव्यवहारे अपभ्रंशानामपशब्दानामसाधुशब्दानां वा सत्ता सर्वैः तथैव स्वीक्रियते यथा साधुशब्दानामङ्गीक्रियते ।

अत्र सर्वेषां मतानां परीक्षणेन महाभाष्यवाक्यपदीयादिग्रन्थानां प्रमाणेन वैयाकरणानां मतं युक्तिसङ्गतं व्यावहारिकं शास्त्रप्रेरकञ्चेति स्वीकर्तुं शक्यते ।

लोकव्यवहारदृष्ट्या उभयोः शब्दापशब्दयोः समाना गतिर्भवति किन्तु शब्देनैवार्थोभिधेयः नापशब्देन अन्यथा शास्त्रवैयर्थ्यापत्तिः स्यात् । यथा निर्दिशति भगवान् भाष्यकारः 'समानायामर्थावगतौ शब्देन चापशब्देन च तत्र धर्मनियमः क्रियते शब्देनैवार्थोऽभिधेयो नापशब्देनेति एवं क्रियमाणमभ्युदयकारि भवतीति ।'[32]

अर्थाद् उभयविधशब्देषु अर्थबोधिका शाब्दबोधकारणभूता शक्तिर्भवति । अपभ्रंशेषु सा शक्तिः साधुशब्दस्मरणकारणात् साक्षाद्वा भवतु नाम अभ्युदयार्थिभिः शब्देनैवार्थोऽभिधेयः नापशब्देनेति भावः । एवञ्च क्रियमाणमर्थाच्छास्त्रज्ञानपूर्वकमुच्चार्यमाणं साधुशब्दोच्चारण-मभ्युदयकारि भवति । यथा 'एकः पूर्वपरयोः इति सूत्रभाष्ये पुनः स्मारयन् निगदति भाष्यकारः।', 'एकः शब्दः **सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति।'**[33]

अर्थात् एकोऽपि साधुशब्दः सम्यक्तया ज्ञातः अवगतः शास्त्रसिद्धो यदि प्रयुज्यते स स्वर्गे लोके चोभयत्रापि कामान् पिपर्ति, शास्त्ररक्षणे च समर्थो भवतीति नात्र सन्देहः, साधुशब्द एव ब्रह्मस्वरूपो भवतीतिशम् ।

सन्दर्भा:


1. म. भा. पस्पशाह्निकम्
2. म. भा. 1/1/68 सूत्रे
3. तत्रैव प्रदीप:
4. वा. प. सम्बन्धसमुद्देश: कारिका 29
5. तत्रैव हेलाराज:
6. काशिका 2/1/2 सूत्रे
7. तत्रैव न्यास:
8. अमरकोष: 1/6/2
9. म. भा. पस्पशाह्निकम्
10. वा. प. 1/147
11. तत्रैव स्वोपज्ञवृत्ति:
12. वा. प. 1/48-50
13. म. भा. पस्पशाह्निकम्
14. म. भा. पस्पशाह्निकम्
15. तत्रैव प्रदीप:
16. म. भा. पस्पशाह्निकम्
17. वा. प. 1/27
18. वा. प. 1/139
19. तत्रैव स्वोपज्ञवृत्ति:
20. न्यायमञ्जरी पृ. 388
21. वैयाकरणभूषणसार:, शक्तिनिर्णय: ।
22. परमलघुमञ्जूषाशक्तिनिरूपणम् ।
23. तत्रैव
24. वा. प. 152-153
25. परमलघुमञ्जूषाशक्तिनिरूपणम् ।

26. वा. प. 1/121

27. वा. प. 2/146-147

28. तत्रैव पुण्यराजः

29. मी. द. शाबरभाष्यम् 1/3/26

30. मी. द. 1/3/28

31. मी. द. शा. भा. 1/3/29

32. म. भा. पस्पशाह्निकम्

33. म. भा. 6/1/84 सूत्रे

आचार्य्यः ( व्याकरणविभागः )
राष्ट्रियसंस्कृतसंस्थानम् ( मा.वि. )
क. जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई - ७७

❖❖❖

ख्यातं राष्ट्रियसंस्कृतं सुमहितं संस्थानमद्याखिलं,
वाणीवैभवमातनोति नितरां राष्ट्रे चतुर्दिग्भवम्।
तत्रासौ निजगौरवेण महता सारस्वतं भासयन्,
सोमैयाभुवि भासते परिसरो मुम्बापुरे संस्थितः॥


राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
NAAC द्वारा A श्रेण्यां प्रमाणितम्
(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)
क.जे.सोमैया-संस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई-77


Scanned with OKEN Scanner

ISSN-2277-6443

# विद्यारश्मिः

## राष्ट्रियवार्षिकशोधपत्रिका

## Annual National Research Journal

2016

योऽनूचानः स नो महान्।
राष्ट्रियसंस्कृतसंस्थानम्



राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)

NAAC द्वारा A श्रेण्यां प्रमाणितम्

(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)

क.जे.सोमैया-संस्कृतविद्यापीठम्

विद्याविहारः, मुम्बई-77

Scanned with OKEN Scanner

ISSN-2277-6443

# विद्यारश्मिः

## राष्ट्रियवार्षिकशोधपत्रिका

**Annual National Research Journal**
**2016**

वेदर्चामर्चयन्तस्स्मृतिचयवचनं तत्त्वतश्चर्चयन्तः
शास्त्रान्तःसंस्पृशन्तोऽमृतगतिमतिदं दर्शनं दर्शयन्तः ।
साहित्यं स्वादयन्तस्सहृदयवसतौ भासमुद्भासयन्तो
विद्याया रश्मयो ज्ञान् पिपुरतु सुधियां शेमुषीमेधयन्तः ॥


**प्रधानसम्पादकः**

प्रो. एम्. चन्द्रशेखरः
प्राचार्य्यः

**सम्पादकाः**

प्रो. प्रकाशचन्द्रः
प्रो. मदनमोहनझाः
डा. नारायणन्. ई. आर्.
प्रो. ई. एम्. राजन्
प्रो. बोधकुमारझाः
डा. ( श्रीमती ) गीता दुबे



राष्ट्रियसंस्कृतसंस्थानम् ( मानितविश्वविद्यालयः )

NAAC द्वारा 'A' श्रेण्यां प्रत्यायितम्

( भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम् )

क. जे. सोमैयासंस्कृतविद्यापीठम्, विद्याविहारः, मुम्बई - ७७


Scanned with OKEN Scanner

© प्रकाशकाधीनः

प्रकाशकम् राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
NAAC द्वारा 'A' श्रेण्यां प्रत्यायितम्
(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)

प्रकाशनवर्षम् 2016

अङ्कः पञ्चमः

प्रधानसम्पादकः प्रो. एम्. चन्द्रशेखरः, प्राचार्यः

सम्पादकमण्डलम् प्रो. प्रकाशचन्द्रः
प्रो. ई. एम्. राजन्
प्रो. मदनमोहनझाः
प्रो. बोधकुमारझाः
डा. नारायणन्. ई. आर्.
डा. (श्रीमती) गीतादुबे

पत्रिकाप्रतिरूपाणि 200

मुद्रकः वन्दना आर्ट्स्, मुम्बई ।

अवधातव्यम् पत्रिकायाममुष्यां प्रकाशितलेखानां मौलिकत्वस्य तत्रत्यप्रतिपादितविचारस्य च कृते समग्रमुत्तरदायित्वं पत्रलेखकानामेव, न तु प्रकाशकस्य, सम्पादकस्य वेति स्पष्टं विज्ञप्यते ।

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
NAAC द्वारा 'A' श्रेण्यां प्रत्यायितम्
(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)
क. जे. सोमैयासंस्कृतविद्यापीठम्, विद्याविहारः, मुम्बई - ७७

Scanned with OKEN Scanner

# शोधपत्रविषयक्रमः पृष्ठाङ्कनिर्देशश्च


| क्र. सं. | विषयः | लेखकः | पृष्ठाङ्कः |
|---|---|---|---|
| 1 | पालिसाहित्यपरिप्रेक्ष्ये पारमिता (एकं विश्लेषणम्) | प्रो. एम्. चन्द्रशेखरः | 1 |
| 2 | संस्कृताध्यापकानां व्यक्तित्वविकासः, उपायाश्च | प्रो. लोकमान्यमिश्रः | 8 |
| 3 | अपभ्रंशेषु शक्तिविचारः | प्रो. प्रकाशचन्द्रः | 17 |
| 4 | ध्वन्यालोकस्थध्वनिलक्षणकारिकाविवेकः | प्रो. ई. एम्. राजन् | 27 |
| 5 | शिक्षामनोविज्ञानस्य प्रयोगविधिः | प्रो. मदनमोहनझाः | 31 |
| 6 | शिवतत्त्वस्य स्फोटतत्त्वस्य चाभेदः | प्रो. बोधकुमारझाः | 40 |
| 7 | सूत्रक्रमानुसारिणी व्याकरणशिक्षणपद्धतिः | डा. देवदत्तसरोदे | 48 |
| 8 | भारतीयसंविधानस्य मूलावधारणानां विश्लेषणं समालोचनञ्च | डा. वी. एस्. वी. भास्कररेड्डी | 58 |
| 9 | Variations in the Sanskrit & the English Grammer Systems | Dr. Narayanan E. R. | 71 |
| 10 | व्याकरणशास्त्रदृष्ट्या वाचनाभिव्यक्त्यो-र्भाषामनोविज्ञानम् | डा. गायत्रीमुरलीकृष्णः | 75 |
| 11 | वेदव्याख्या में निरुक्तकार का अवदान | डा. जयप्रकाश नारायण | 81 |
| 12 | प्रश्नप्रकरणप्रेरकवैविध्यकौशलयोः वैशिष्ट्यम् | डा. सच्चिदानन्दमूर्तिः | 89 |
| 13 | सुमुहूर्त्तनामकरणवैशिष्ट्यम् | डा. जयकृष्णन् नम्पूतिरि एन्. डि. | 98 |
| 14 | वास्तुशास्त्रे मुहूर्त्तविचारः | डा. विष्णुकुमारनिर्मलः | 108 |
| 15 | राधाचरितमहाकाव्यसमीक्षा | डा. स्वर्गकुमारमिश्रः | 113 |
| 16 | हिन्दी वाङ्मय में संस्कृत वाङ्मय का प्रभाव | डा. संजय कुमार मिश्र | 124 |
| 17 | वृत्तिस्वरूपविमर्शः | डा. मनमोहनतिवारी | 130 |
| 18 | एकविंशशताब्द्यां दूरशिक्षा | डा. सीतारामशर्मा | 134 |
| 19 | काव्य का शाश्वत प्रयोजन 'परोपकार' | डा. राजेशकुमारशुक्ल | 144 |
| 20 | Dramatic Purpose of Supernatural interventions in the plays of Kalidasa and Shakespeare | Dr. Shweta Sood | 152 |


Scanned with OKEN Scanner

| | | | |
|---|---|---|---|
| 21 | वृत्तिविमर्शः | डा. माधवदत्तपाण्डेयः | 160 |
| 22 | समासवृत्तिविमर्शः | डा. नवीनकुमारमिश्रः | 165 |
| 23 | विवाह में मेलापक विचार | डा. सुभाषचन्द्र मिश्र | 172 |
| 24 | शुभाशुभशकुन निर्णय | डा. आशीष कुमार चौधरी | 183 |
| 25 | वक्रोक्तिविमर्शः | डा. राकेशकुमारजैनः | 192 |
| 26 | संस्कृत एवं हिन्दी साहित्य के आधार पर रामचरितमानस में रसविचार | डा. (श्रीमती) गीतादेवी दूबे | 198 |
| 27 | शिक्षकस्य व्यक्तित्वं वैयवसायिक-क्षमतोन्नयनहेतुः | डा. कुमारः | 208 |
| 28 | लक्षणा तेन षड्विधा | डा. एम्. सुदर्शनचिपळूणकरः | 213 |
| 29 | A Comparative Study of Kalidasa's Abijnanasakuntalam and Shakespeare's - The tempest | Dr. Suman Singh | 216 |
| 30 | शिक्षक में सामाजिक दृष्टिकोण | डा. सुनील कुमार शर्मा | 223 |
| 31 | वेधशालायाः परिचयः | श्रीविजयानन्दः अडिगः | 230 |
| 32 | मराठीभाषाविज्ञाने वृत्तिविमर्शः | सुरेश चेमटे | 235 |
| 33 | परम्परानुरूपसूत्रवृत्तिस्वरूपविमर्शः | सुश्रीः मौनिका बोल्ला | 241 |
| 34 | सभ्याभरणे समर्थसूत्रवृत्तिविचारः | एल्. सविता आर्या | 248 |
| 35 | Relation Between English & Sanskrit Literature | Trupti Mohanta | 252 |
| 36 | विवाहे मेलापकस्य महत्त्वम् | नूतानी ग्रहाचार्य | 268 |
| 37 | शब्दार्थसम्बन्धस्वरूप | महात्मा वीणापाणि त्रिपाठी | 275 |
| 38 | परमलघुमञ्जूषानुसारं लक्षणाखण्डनविमर्शः | ऋतम्भरा पाण्डेय | 281 |


❖❖❖

Scanned with OKEN Scanner

# शिवतत्त्वस्य स्फोटतत्त्वस्य चाभेदः

✍ प्रो. बोधकुमारझाः

(ब्रह्माण्डे यत्किमपि सत्यं, शिवं, सुन्दरं च, तत्सर्वं शिवात्मकमेवेति आतिष्ठन्ते शिवतत्त्वविदः । क्वचिच्छिवः चाक्षुषप्रत्यक्षतां क्वचिच्च तदप्रत्यक्षतां धत्ते इति त्वन्यत् । भारतीयदर्शनेषु व्याकरणमपि दर्शनत्वेन प्राचीनकालादेव प्रतिष्ठितम् । अस्मिन् शब्दाद्वैतवादः आत्मभूतः स्फोटवादरूपेण समुपास्यते शाब्दिकैः । निबन्धेऽस्मिन् तमेव सिद्धान्तमाश्रित्य क्रमशः शिवतत्त्वं, स्फोटतत्त्वं, स्फोटतत्त्वस्य ब्रह्मरूपत्वं, शिवस्फोटयोश्चाभेदः नानायुक्तिभिः निरूपितम् ।)

अथेदं शिवतत्त्वं नाम किम्? स्फोटतत्त्वं नाम किम्? इति प्रतिपाद्य शिवतत्त्वानां स्फोटतत्त्वेषु गवेषणञ्च विधाय एकयैव श्रुत्या शिवतत्त्वस्फोटतत्त्वयोः यथा निरूपणं तथा प्रस्तवीमीति प्रतिजाने । तत्र तावत्-

**किमिदं शिवतत्त्वम्?**-त्रिशिखिब्राह्मणोपनिषदि[1] शिवस्य नित्यत्वं, शुद्धत्वं, निरञ्जनत्वं, विभुत्वमेकत्वम्; श्वेताश्वतरोपनिषदि[2] शिवस्य मायावत्त्वं, महेश्वरत्वं, व्यापकत्वं; वराहोपनिषदि[3] शिवस्य गुरुत्वम्, वेदत्वम्, देवत्वम्, प्रभुत्वम्, सर्वमयत्वम्; माण्डुक्योपनिषदि[4] शिवस्य शान्तत्वम्, अद्वैतत्वम्, आत्मत्वम्, विज्ञेयत्वम्; सदानन्दोपनिषदि[5] च शिवस्य ब्रह्मणः विष्णोश्चापेक्षया परत्वम्; श्रीमद्भगवद्गीतायां[6] शिवस्य रुद्रत्वम्, शङ्करत्वम्, उपद्रष्टृत्वम्, अनुमन्तृत्वम्, भर्तृत्वम्, भोक्तृत्वम्, परमात्मत्वम्, परपुरुषत्वं च भूयो भूयस्तत्र तत्र शब्दतः अर्थतश्चोक्तम् । सिद्धान्तशैवदर्शने[7] च शिवस्य ज्ञानक्रियात्मकशक्तिद्वययुतत्वम्, स्वतन्त्रत्वम्, प्रभुत्वम्, पतित्वञ्च प्रतिपाद्यते । स चायं पतिः निष्कम्पोऽचलमूर्त्तिमान् । द्विधा हि आत्मनां मूर्तिः - चला, अचला चेति । तत्र चला तत्त्वभौवनशरीरात्मिका, अचला तु ज्ञानक्रियास्वभावा। तत्रायं पतिरचलमूर्त्तिमान्, न तु भौवनशरीरयुक्तः । अचलमूर्त्तिलक्षणा च शक्तिः सर्वोत्कृष्टा परमाण्वादेरप्यतिसूक्ष्मा सर्वदिग्गता अमृतात्मिका प्रध्वस्तावरणा शान्ता

आद्यन्तशून्या करुणाभरिताऽस्य पत्युः शरीरत्वेनोपचर्यते । पत्युः शक्तिरेव करणम्, तयैव तत्तत्क्रियानिष्पादनात् । यथा लोकेऽमूर्त्तोऽपि कालः क्षणमुहूर्त्तादिकः षड्ऋतुरूपः स्वस्वोचितपुष्पफलादीनां प्रतिक्षणं द्रव्यपरिपाकस्य बाल्ययौवनादेश्च साधकः कर्त्ता प्रख्यायते, एवममूर्त्तोऽपि शिवः कार्य्यं क्षित्यादिकं जगत् स्वकीययेच्छाशक्त्या निष्पादयतीति । सिद्धान्तकौमुदीकारः श्रीमद्भट्टोजिदीक्षितः कौमुदीग्रन्थमध्ये स्वकृते मङ्गले शिवस्य श्रोत्रियत्वेन योग्यत्वेन च प्रसिद्धत्वम्, गुणवत्त्वम्, प्रत्यहं महर्षिभिः तोष्टूय्यमानत्वम्, विभुत्वम्, सर्वोत्कर्षेण वर्त्तित्वम्, अगुणत्वं च प्रतिपादयति[8] । न चैकस्यैव तोष्टूय्यमानत्वम्, अगुणत्वञ्चेति विरुद्धमिति वाच्यम्, स्तुतिप्रयोजकीभूतानामनन्तकल्याणगुणानां श्रुतिस्मृतिसिद्धत्वेऽपि वियदादिवत् व्यावहारिकत्वात् तदभावस्य च पारमार्थिकत्वाद् विरोधाभावात् । न च श्लोकेऽस्मिन् शिवपदानुपादाने कथं शिवस्यैतानि विशेषणानीत्यपि वाच्यम्, ग्रन्थान्तमङ्गले शिवस्यैव कीर्त्तनात् ग्रन्थमध्यस्थमङ्गलेऽपि तथैव ज्ञेयौचित्यात् । ग्रन्थान्तमङ्गले च श्रीमद्भट्टो भवानीविश्वनाथपदमुच्चार्य शिवस्य सम्पृक्तस्वरूपं नः पुरस्तात् प्रस्तौति[9] । अयमेव भूषणसारकारिकान्ते शब्दतत्त्वात्मकत्वम्, निरञ्जनत्वम्, ब्रह्मत्वम्, अक्षरत्वम्, पूर्णात्मत्वञ्च शिवस्य आवेदयति[10] । भूषणसारकृत् कौण्डभट्टश्च विष्णोः रूपाद् अभिन्नं गौरीरमणरूपं स्मृत्वा जगद्विवर्त्तस्योपादानकारणत्वम्, शेषभूषणत्वम्, अशेषफलदातृत्वम्, भवाब्धितरणतरित्वं च शिवस्य प्रस्तावयति[11] । परिभाषेन्दु-लघुमञ्जूषाकारो नागेशः शिवस्य साम्बशिवरूपत्वं ग्रन्थादौ ध्यायन् तस्य ब्रह्मत्वमामनति[12] ।

**किमिदं स्फोटतत्त्वम्?** - तत्र तावत् स्फुट्यते ध्वनिना अभिव्यज्यत इति कर्म्मव्युत्पत्त्या, स्फुटत्यर्थोऽनेनेति करणव्युत्पत्त्या च घञन्तः स्फोटशब्दो निष्पद्यते । अतश्च ध्वनिव्यङ्ग्यत्वे सति अर्थविषयकबोधजनकत्वं स्फोटस्य लक्षणं पर्यवसन्नम् । वस्तुतस्तु वैयाकरणसिद्धान्तानुसारं[13] यदनादिनिधनं शब्दात्मकं ब्रह्म तज्ज्ञानार्थमेव प्रकृतिप्रत्ययादिविभागः काल्पनिकः कृतो वर्त्तते । असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते - इति रीत्या शास्त्रेषु प्रक्रियाभेदेन अविद्याया एवोपवर्णनम्, तत एव च सत्यस्योपलब्धिः । अयञ्च स्फोटात्मकः शब्दः तत्तत्प्राणिहृदयदेशाऽवच्छिन्नाकाशदेशस्थः विराट्पुरुषस्यापि हृदयरूपबाह्याकाशदेशस्थ-श्च । स चैको लाघवात् । विभुश्च व्यापनात् । यथैकत्र श्वेतद्रव्ये रूपं व्यापकम्, सर्वावयवावच्छेदेन सम्बद्धम्, तथायमप्याकाशदेशस्थः तथा वक्तुं शक्य इति विभुत्वं स्फुटम् ।

एवमेव "सोऽयं गकारो यः पूर्वदिने श्रुतः" इति प्रत्यभिज्ञया तावत्कालं स्थिरत्वसिद्धौ स्फोटस्य नित्यत्वे पर्यवसानम् । शब्दनित्यत्ववाद एव स्फोटवादस्याधारः । "तदशिष्यं संज्ञाप्रमाणत्वात्[14]" "पृषोदरादीनि यथोपदिष्टम्[15]" इत्यादीनि सूत्राणि प्रणीय पाणिनिना शब्दस्य नित्यत्वं स्पष्टमेवोद्घुष्टम् । "सिद्धे शब्दार्थसम्बन्धे[16]" इति वार्तिकमारभता कात्यायनेनापि स्पष्टमेव स्वीकृतं तत् तथ्यम् । महाभाष्यकारेण पतञ्जलिनापि "नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोजनविकारिभिः[17]" इत्येवं रूपेण व्याहरता शब्दस्य नित्यत्वमङ्गीकृतम् । अयं च नित्यः स्फोटः ज्ञातमर्थं विवक्षोः पुंसः इच्छया जातेन प्रयत्नेन यदा मूलाधारे संस्कृतपवनेनाभिव्यज्यते, तदा पवरागित्युच्यते । नाभिपर्यन्तमागच्छता तेन वायुना अभिव्यक्तः केवलं मनोविषयः सूक्ष्मतरः पश्यन्तीत्युच्यते । हृदयर्प्यन्तमागच्छता तेन वायुना अभिव्यक्तः परश्रवणग्रहणायोग्यः सूक्ष्मो मध्यमा वागित्युच्यते। प्रापय्य कण्ठदेशं मूर्धानमाहत्य परावृत्तेन वायुना अभिव्यक्तो हि स्फोटो वैखरीनाम्ना प्रसिद्धो विवेचितो लघुमञ्जूषायाम्[18] । एतावता स्फोटस्य शब्दतत्त्वं, विभुत्वं, नित्यत्वं, एकत्वञ्चायातम् । तत्र-

**स्फोटतत्त्वं ब्रह्मतत्त्वम्** एव । वराटिकान्वेषणाय प्रवृत्तश्चिन्तामणिं लब्धवानिति वासिष्ठरामायणोक्ताभाणकन्यायेन[19] शब्दविचाराय प्रवृत्तः सन् वैयाकरणः अद्वैते औपनिषदे ब्रह्मण्यपि व्युत्पद्यते, यतश्च भाष्यवाक्यपदीयभूषणमञ्जूषादौ शब्दस्य ब्रह्मत्वेन निरूपणं कृतमिति विलोकयामः । तत्र महाभाष्ये प्रत्याहाराह्निके "वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्त्तते" इति श्लोकवार्त्तिकं व्याचक्षाणः प्रदीपकारः कैयटः "वेदितव्यो ब्रह्मराशिः" इति भाष्यप्रतीके "ब्रह्मतत्त्वमेव शब्दरूपतया प्रतिभातीत्यर्थः" इति स्पष्टतया शब्दस्य ब्रह्मत्वं ब्रवीति । वाक्यपदीयकारो भर्तृहरिः "अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्[20]" इति ब्रुवाणः शब्दतत्त्वं ब्रह्मतत्त्वमिति प्रतिज्ञाय सम्पूर्णे ब्रह्मकाण्डे शब्दस्य ब्रह्मत्वं निरूपयामास । एवमेव "इत्थं निष्कृष्यमाणं यच्छब्दतत्त्वं निरञ्जनम् । ब्रह्मैवेत्यक्षरं प्राहुस्तस्मै पूर्णात्मने नमः[21]" इति कारिकां विवेचयन् भट्टकौण्ड आह - "नामरूपे व्याकरवाणि[22]" इति श्रुतिसिद्धा द्वयी सृष्टिः। तत्र रूपस्येव नाम्नोऽपि तदेव तत्त्वम् । प्रक्रियांशस्त्व-विद्याविजृम्भणमात्रम् । ब्रह्मैवेत्यनेन 'अत्रायं पुरुषः स्वयञ्ज्योतिः'[23] 'तमेव भान्तमनुभाति सर्वम्'[24] 'तस्य भासा सर्वमिदं विभाति'[25] इति श्रुतिसिद्धस्वपरप्रकाशत्वं सूचयन् यौगिकस्फोटशब्दाभिधेयत्वं सूचयती'ति । मञ्जूषायां च प्रपञ्चसारस्य श्लोकम्

'बिन्दोस्तस्माद्भिद्यमानाद्रवोऽव्यक्तात्मकोऽभवत् । स एव श्रुतिसम्पन्नः शब्दब्रह्मेति गीयते'[26] इति उद्धरन् नागेशोऽपि शब्दस्य ब्रह्मत्वं स्वीचकार । एवञ्चायं शब्दब्रह्मवाद एव इतरेभ्यो दर्शनेभ्यो व्याकरणदर्शनं परिच्छिनत्ति । अत्र वादे श्रुतयोऽपि प्रमाणत्वेनोपलभ्यन्ते ।

तथाहि यथा 'सच्चिदानन्दं ब्रह्म'[27] इत्यनया श्रुत्या ब्रह्मणः सद्रूपत्वं चिद्रूपत्वमानन्दरूपत्वञ्च प्रतिपादितमस्ति, तथैव 'वाग्वै ब्रह्म'[28] इत्यनया श्रुत्या ब्रह्मणः वाग्रूपत्वमपि विज्ञापितमस्ति । एवं च 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्ति अभिसंविशन्ति'[29] इत्यादिश्रुत्या ब्रह्मणो जगत्कर्तृत्वं, पालयितृत्वं, संहर्तृत्वं प्रतिपाद्यते यथा, तथैव 'वागेव विश्वा भुवनानि जज्ञे' इत्यनया वाचो भुवनकर्तृत्वम्, 'वागेवेदं बुभुजे' इत्यनया च 'भुज-पालनाभ्यवहारयोः' इति स्मरणात् भुवनपालकत्वं संहारकत्वं च प्रतिपाद्यते । एवञ्चोक्तयोः द्विविधश्रुत्योः एकवाक्यता वाक्तत्त्वस्य ब्रह्मरूपता समागता । तस्यां च चिद्रूपताऽपि सुतरां निश्चेतुं शक्या, 'सच्चिदानन्दं ब्रह्म' 'नित्यं विज्ञानमानन्दं ब्रह्म'[30] इत्यादिश्रुतिजाते ब्रह्मणश्चिद्रूपत्वेन संकीर्तनात् । एवं स्थितौ न हि चिद्रूपत्वमेवापितु सद्रूपत्वामानन्दरूपत्वमपि वाचि नितरां चकास्ति । किञ्च यथा 'घटः सन्' 'पट् सन्' इत्येवंरूपेण आनन्दरूपानुवेधः, 'घटो भाति' 'पटो भाति' इत्यादिरूपेण चिद्रूपानुवेधः, 'घटः प्रियः' इत्यादिरूपेण आनन्दरूपानुवेधः, तथैव वाचकशब्दानुरूपानुवेधोऽपि सर्वत्र प्रपञ्चे बोद्ध्यः । अस्तु ।

**द्वयोरभेदत्वम्** – शिवतत्त्वं स्फोटतत्त्वं चेत्युभयस्य शब्दात्मकत्वाद् ब्रह्मरूपत्वमेव । उभयस्यैव हृदयरूपमेकमधिकरणम् 'सर्वस्य चाहं हृदि सन्निविष्टः[31]', 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति[32]' 'रुद्राणां शङ्करश्चामि[33]' इति गीतवचनात् 'प्रणवं हीश्वरं विद्यात् सर्वस्य हृदि संस्थितम् । सर्वव्यापिनमोङ्कारं मत्वा धीरो न मुह्यति[34]' इत्युपनिषद्वाक्याच्च शिवस्य हृदयदेशस्थमध्यमाव्यङ्ग्यस्फोटस्य च समानाधिकरणत्वं विज्ञेयम् । योगशिखोपनिषदि अपि शिवस्य परायाश्च समानदेशत्वं भणितम् । तद्यथा – 'शिवस्य जीवरूपस्य स्थानं तद्धि प्रचक्षते । यत्र कुण्डलिनी नाम पराशक्तिः प्रतिष्ठिता[35]' इति । एवञ्च बृहदारण्यकोपनिषदि यथा 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः[36]' इत्युक्त्या ब्रह्मणः उपासनीयत्वं प्रतिपादितम्, तथैव तत्रैव 'वाचं धेनुमुपासीत, तस्याश्चत्वारः स्तनाः स्वाहाकारो वषट्कारो हन्तकारः स्वधाकारः' इत्यादिना वाग्रूपस्य स्फोटस्यापि समुपासनीयत्वं प्रदर्श्यते ।

अपि च पारमार्थिकरूपेण यथा ब्रह्मणि नास्ति प्रपञ्चाध्यासः, किन्तु व्यावहारिकमध्यस्तत्वमस्ति । यथा अन्नमयादिकोशाः आनन्दमयस्य शुद्धब्रह्मणः परेत्यपरनामधेयस्य प्राप्त्युपायाः सन्ति । यथोक्तं भूषणे - 'पञ्चकोशादिवत्तस्मात् कल्पनैषा समाश्रिता[37]' इति तैत्तिरीयश्रुतौ यथा 'यतो वा इमानि भूतानि जायन्ते[38]' इत्यादिना ब्रह्मणः उपादानत्वं प्रतिपाद्यते तथैव 'स भूरिति व्याहरत्, स भूमिमसृजत् [39]', सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् । वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे[40]' इत्यादिश्रुतिस्मृत्यादिभिः शब्दस्यापि उपादानकारणत्वं प्रस्तूयते । भगवान् भर्तृहरिरपि ब्रह्मस्थानीयस्य शिवस्य स्फोटस्य च 'अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् । विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः' इति ब्रुवाणः तयोरभेदं व्यनक्ति । भगवता महाभाष्यकृता 'चत्वारि वाक्परिमिता पदानी[41]' त्यादिना शब्दब्रह्मणः परावाग्रूपता प्रतिपादिता । तत्रैव 'चत्वारि श्रृङ्गा त्रयो अस्य पादा[42]' इत्यादिमन्त्रं व्याचक्षाणो महाभाष्यकारः कथयति - 'महो देवो मर्त्यां आविवेश, महान् देवः शब्दः, मर्त्या मरणधर्माणो मनुष्यास्तानाविवेश । महता देवेन नः साम्यं यथा स्यादि[43]'ति । अत्र प्रदीपकारेण श्रीकैयटेन महतेत्यस्य 'परेण ब्रह्मणा' इत्यर्थः कृतः । उद्योगकृता श्रीनागेशभट्टेन - 'महान् परब्रह्मरूपो देवोऽन्तर्यामिरूपः शब्दो मर्त्येष्वाविष्ट इत्यर्थः, तदावेशकत्वमाह - महता देवेनेति । साम्यं सायुज्यम्' इति व्याख्यातम् । तदुक्तं हरिणा - 'अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम् । प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते[44]' इति । तदेवमुक्तसन्दर्भेण परब्रह्मतत्त्वेन स्फोटतत्त्वात्मकं वाक्तत्त्वं, शिवतत्त्वञ्च, तयोश्चभेदः इत्यवगतम्भवति । किम्बहुना, ऋग्वेदे एकस्मिन्नेव मन्त्रे द्वयोः शिवतत्त्ववाक्तत्त्वयोः निरूपणं कृतम् । स चायं मन्त्रः -

**चत्वारि श्रृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।**
**त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्त्यां अविवेश ॥ इति ।**

अत्र मन्त्रे शब्दस्य वृषभत्वेन महादेवत्वेन च निरूपणं विद्वद्रूपेणानुशोचनीयम् । शब्दस्य वृषभत्वं कुत इति तु पतञ्जलिकृतेन व्याख्यानेनावगन्तव्यम् । तथा चोक्तम् - 'चत्वारि श्रृङ्गाणि - पदजातानि, नामाख्यातोपसर्गनिपातश्च । त्रयो अस्य पादाः - त्रयः कालाः - भूतभविष्यद्वर्त्तमानाः । द्वे शीर्षे - द्वौ शब्दात्मानौ - नित्यः कार्य्यश्च । सप्त हस्तासो अस्य - सप्त विभक्तयः । त्रिधा बद्धः - त्रिषु स्थानेषु बद्धः - उरसि कण्ठे शिरसीति । वृषभो

वर्षणात् । रोरवीति - शब्दं करोति । कुत एतत् ? रौति: शब्दकर्म्मा' इत्यादि । अत्र मन्त्रे शिववाहनस्य वृषभस्यैवोपादानं नान्यस्य पश्वादे:, अपि च शिवस्यापरपर्यायस्य सुप्रसिद्धस्य महादेवस्यैव नाम ग्रहणं, नान्यदेवस्येति स्फुटं शिवतत्त्वं चकास्ति । मन्त्रममुमेव पश्यता मया सर्वप्रथमं शब्दतत्त्वस्य शिवतत्त्वस्य चाभेदो दृष्ट:, तदनन्तरं चान्यत्र तत्तत्त्वमनुसंहितम् । निबन्धान्ते चैकविचारो मनसि जागरित: यो भवताम्पुरस्तादुपस्थाप्यते - शिवस्य भक्तशिरोमणे: महाकविकालिदासस्य - 'वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये । जगत: पितरौ वन्दे पार्वतीपरमेश्वरौ' इतिरूपे रघुवंशस्य मङ्गलाचरणे 'इव' शब्दस्य यत्सदृशार्थकत्वम्, तत्रत्यं सादृश्यञ्च च न भेदघटितम्, अपितु साधारणधर्मसम्बन्धप्रयोज्यमेव । अथवा इवशब्द: एवार्थक इति गृहाण । तेन शब्दार्थयो: पार्वतीपरमेश्वरयो: चाभेदस्य ज्ञापने कालिदासस्यापि समर्थनमिति प्रत्येमीति प्रतिपाद्य स्फोटाभिन्नं शिवं दिध्यासामि ।

**सन्दर्भा:**

1. 'नित्य: शुद्धो निरञ्जनो विभुरद्वय: शिव: एक:' (त्रि.ब्रा.-1-1)
2. ''मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
   अस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥'' (श्वेता.उप.-4-10)
3. ''शिवो गुरु: शिवो वेद: शिवो देव: शिव: प्रभु: ।
   शिवोऽस्म्यहं शिव: सर्वं शिवादन्यत्र किञ्चन ॥'' (वराहोपनि.4-32)
4. शान्तं शिवमद्वैतं......., स आत्मा स विज्ञेय: (माण्डु.उप.-आ.प्रक.-7)
5. ''परात्परतरो ब्रह्मा तत्परात्परतो हरि: ।
   तत्परात्परतोऽधीशस्तस्मात्स्यादुत्तर: शिव: ॥'' (सदानन्दो.-4)
6. ''रुद्राणां शङ्करश्चास्मि'' (गी.अ.-10, श्लो.-23)
   ''उपद्रष्टानुमन्ता च भर्त्ता भोक्ता महेश्वर: ।
   परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुष: पर: ॥'' (गी.अ.-13, श्लो.-22)
7. ''दृक्क्रियात्मकमैश्वर्यं यस्य तद्दात्रपूर्वकम् । ईश्वर: सोऽत्र मन्तव्य: शक्तिद्वययुत: प्रभु: ॥''
   इति । (पराख्यसूत्रस्य शतरत्नसंग्रहोद्धृतस्य व्याख्यानमेतत्)
8. ''श्रौत्रार्हन्तीचणैर्गुण्यैर्महर्षिभिरहर्दिवम् ।



Scanned with OKEN Scanner

तोष्टूय्यमानोऽप्यगुणो विभुर्विजयतेतराम् ॥'' (सि.कौ.उत्तरार्द्धमङ्गलाचरणम्)

9. इत्थं वैदिकशब्दानां दिङ्मात्रमिह दर्शितम् ।
तदस्तु प्रीतये श्रीमद्भवानीविश्वनाथयोः ॥ (सि.कौ.ग्रन्थान्तमङ्गलम्)

10. ''इत्थं निष्कृष्यमाणं यच्छब्दतत्त्वं निरञ्जनम् ।
ब्रह्मैवेत्यक्षरं प्राहुस्तस्मै पूर्णात्मने नमः ॥'' (वै.भू.का.-74)

11. ''श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम् ।
स्फोटरूपं यतः सर्वं जगदेतद् विवर्त्तते ॥'' (वै.भू.सा.का.-1)
''अशेषफलदातारं भवाब्धितरणे तरिम् ।
शेषाशेषार्थलाभार्थं प्रार्थये शेषभूषणम् ॥'' (पूर्ववत्, का.-2)

12. ''नत्वा साम्बं शिवं ब्रह्म नागेशः कुरुते सुधीः'' (परि.शे.मङ्गलम्)
''नागेशभट्टविदुषा नत्वा साम्बं शिवं लघुः'' (वै.सि.ल.म.-मङ्गलम्)

13. ल.म.र.प्र.पृ.163

14. पा.सू.-1-2-53

15. त्देव-6-3-109

16. पा.महा.,अ.-1, पा.-1, पस्पशाह्निकम्, वा.-1

17. पा.महाभा,अ.-1, पा.-1, आ.-2, जातिपक्षाधिकरणम् ।

18. वै.सि.ल.म., र.प्रभा., पृ.-145, शक्त्याश्रयनिरूपणम् ।

19. शब्दकौस्तुभः, प्र.अ., प्र.पा., प्र.आह्निकम् ।

20. वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिकासंख्या-1 ।

21. वैयाकरणभूषणसारः, ग्रन्थान्तमङ्गलम् ।

22. छान्दो.6-3-2

23. बृहदा.4-3-9

24. कठो.5-15, श्वेता.-6-14

25. मुण्डको.-2-2-10

26. प्रपञ्चसारः, पट.-1, श्लो.-431

27. वज्रसूचि.खण्ड:-9



Scanned with OKEN Scanner

28. बृहदार.4-1-2
29. तैत्तरी.उप.-3-1
30. बृ.उप.-3-1-28
31. गी.अ.-15, श्लो.-15
32. गी.अ.-18, श्लो.-61
33. गी.अ.-10, श्लो.-23
34. माण्डु. आगमप्रक.-22
35. योगशिखोपनिषद्-1-169
36. बृहदा.-4-5-6
37. वै.भू.सा.कारिका-79
38. तै.उप.-3-1
39. तै.ब्रा.उप. 2-2-4-2
40. मनुस्मृ.-1-21
41. ऋ.वे.-1-164-46
42. तदेव-4-58-3
43. म.भा.पस्पशा.
44. वा.प.का.-131

आचार्य्यः ( व्याकरणविभागः )
राष्ट्रियसंस्कृतसंस्थानम् ( मा.वि. )
क. जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई - ७७

❖❖❖



Scanned with OKEN Scanner

ख्यातं राष्ट्रियसंस्कृतं सुमहितं संस्थानमद्याखिलं,
वाणीवैभवमातनोति नितरां राष्ट्रे चतुर्दिग्भवम्।
तत्रासौ निजगौरवेण महता सारस्वतं भासयन्,
सोमैयाभुवि भासते परिसरो मुम्बापुरे संस्थितः॥

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
NAAC द्वारा A श्रेण्यां प्रमाणितम्
(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)
क.जे.सोमैया-संस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई-77

Scanned with OKEN Scanner

ISSN-2277-6443

# विद्यारश्मिः

राष्ट्रियवार्षिकशोधपत्रिका

Annual National Research Journal

2016



राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)

NAAC द्वारा A श्रेण्यां प्रमाणितम्

(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)

क.जे. सोमैया-संस्कृतविद्यापीठम्

विद्याविहारः, मुम्बई-77

ISSN-2277-6443

# विद्यारश्मिः

## राष्ट्रियवार्षिकशोधपत्रिका

**Annual National Research Journal**
**2016**

वेदर्चामर्चयन्तस्स्मृतिचयवचनं तत्त्वतश्चर्चयन्तः
शास्त्रान्तःसंस्पृशन्तोऽमृतगतिमतिदं दर्शनं दर्शयन्तः ।
साहित्यं स्वादयन्तस्सहृदयवसतौ भासमुद्भासयन्तो
विद्याया रश्मयो ज्ञान् पिपुरतु सुधियां शेमुषीमेधयन्तः ॥

**प्रधानसम्पादकः**

प्रो. एम्. चन्द्रशेखरः
प्राचार्यः

**सम्पादकाः**

प्रो. प्रकाशचन्द्रः
प्रो. मदनमोहनझाः
डा. नारायणन्. ई. आर्.
प्रो. ई. एम्. राजन्
प्रो. बोधकुमारझाः
डा. (श्रीमती) गीता दुबे

**राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)**

NAAC द्वारा 'A' श्रेण्यां प्रत्यायितम्

(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)

**क. जे. सोमैयासंस्कृतविद्यापीठम्, विद्याविहारः, मुम्बई - ७७**

Scanned with OKEN Scanner

| | |
|---|---|
| © | प्रकाशकाधीनः |
| प्रकाशकम् | राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)<br>NAAC द्वारा 'A' श्रेण्यां प्रत्यायितम्<br>(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम्) |
| प्रकाशनवर्षम् | 2016 |
| अङ्कः | पञ्चमः |
| प्रधानसम्पादकः | प्रो. एम्. चन्द्रशेखरः, प्राचार्यः |
| सम्पादकमण्डलम् | प्रो. प्रकाशचन्द्रः<br>प्रो. ई. एम्. राजन्<br>प्रो. मदनमोहनझाः<br>प्रो. बोधकुमारझाः<br>डा. नारायणन्. ई. आर्.<br>डा. (श्रीमती) गीतादुबे |
| पत्रिकाप्रतिरूपाणि | 200 |
| मुद्रकः | वन्दना आर्टस्, मुम्बई । |
| अवधातव्यम् | पत्रिकायाममुष्यां प्रकाशितलेखानां मौलिकत्वस्य तत्रत्यप्रतिपादितविचारस्य च कृते समग्रमुत्तरदायित्वं पत्रलेखकानामेव, न तु प्रकाशकस्य, सम्पादकस्य वेति स्पष्टं विज्ञप्यते । |

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)

NAAC द्वारा 'A' श्रेण्यां प्रत्यायितम्

(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)

क. जे. सोमैयासंस्कृतविद्यापीठम्, विद्याविहारः, मुम्बई - ७७

प्रो. पी.एन्. शास्त्री
कुलपति
राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
('ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं प्रत्यायन परिषद् द्वारा मान्यता प्राप्त)

Prof. P.N. Shastry
Vice Chancellor
RASHTRIYA SANSKRIT SANSTHAN
Deemed to be University
(Under MHRD, Govt. of India)
(Accredited by NAAC with 'A' Grade)

RSkS/VC/Msg/2015-16/419

Date 02.03.2016



# सन्देशः

"भूत्यै जागरणम्। अभूत्यै स्वपनम्।"

जगदिदं प्रतिक्षणं परिवर्तते। गतिशीलं जीवनं नवं पन्थानम् अन्विषति। प्राक्तनं संशोध्य परिष्कृतं नूतनम् अवाप्तुं कांक्षति मनः। मानवस्य आकांक्षा संशोधिता नितरां फलति। जिज्ञासुः नरः विद्यया आत्मानं रक्षति। शिक्षितो जनः ज्ञानामृतं पिपासुः अध्ययनेन वर्धते। अत्र विशि राष्ट्रियसंस्कृतसंस्थानस्य मुम्बईस्थः सोमैयापरिसरः "विद्यारश्मिः" इत्याख्यां शोधपत्रिकां प्रकाशयतीति ज्ञात्वा भृशं तुष्यति मे चेतः। आचार्याणां शोधलेखाः छात्राणाञ्च लेखाः पत्रिकाम् इमां भूषयन्तीति मन्ये। सेऽयं पत्रिका "विद्यारश्मिः" श्रेयसे कल्पताम् इति कामये।

प्रधानसम्पादकप्रभृतिभ्यः सर्वेभ्यः विद्यारश्मिपरिवारस्य सदस्येभ्यः शुभः स्यात् सन्देशः।

शोधपत्रिकाप्रियः
भावत्कः
पी.एन.शास्त्री
(पी.एन. शास्त्री)
कुलपतिः




Scanned with OKEN Scanner

**Shree Somnath Sanskrit University**
(Estd. by Government of Gujarat)
Rajendra Bhuvan Road, VERAVAL-362 266
District : Gir Somnath, Gujarat, INDIA
Phone : 02876 - 244531 • Fax : 02876 - 244417

**Prof. Ark Nath Chaudhary**
Vice - Chancellor

Ref. : SSSU/VC/224/2016

Date - 16-2-2016



## शुभकामनासन्देशः

प्रियाः प्रो. चन्द्रशेखरमहोदयाः

प्राचार्याः

राष्ट्रियसंस्थानस्य मुम्बईस्थस्य क.जे. सोमैया-संस्कृतविद्यापीठपरिसरस्य राष्ट्रियशोधपत्रिका 'विद्यारश्मिः' इति प्राकाश्यं नीयमानेति विज्ञाय प्रसादमनुभवामि ।

भवतां नेतृत्वे व्याकरणशिक्षाशास्त्रसाहित्यज्योतिषशास्त्रादिविषयेऽध्याप्यमानानां सुयोग्यानाम् आचार्याणाम् उपाचार्याणां सहायकाचार्याणां च शोधलेखैः, विशिष्टविदुषां वैदुष्यपूर्णैः लेखैः, शोधर्थिनाञ्च शोधपरकैः मूल्यवद्भिः लेखैः, छात्रान्तराणां च भाषात्रये गवेषणापरकज्ञानपूर्णलेखैः सम्भृता ग्रथिता चेयं पत्रिका संस्कृतशास्त्रजिज्ञासूनां कृते भृशं उपकारिका स्यादिति विभावये ।

अवसरेऽस्मिन् प्राचार्यसहितेभ्य आचार्यच्छात्रेभ्यः मदीया अशेषशुभकामनाः सन्तु ।

भवदीयः

(प्रो. अर्कनाथचौधरी)
कुलपतिः

Phone : (R) 02876-244530, (M) 094266 87450, - 08462830055
Email : vc.sssuni@gmail.com, choudharyarknath@gmail.com

Scanned with OKEN Scanner

प्रो. रमेशकुमारपाण्डेयः
कुलपतिः

Prof. Ramesh Kumar Pandey
Vice Chancellor

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
'ए' ग्रेड (नैक द्वारा)
बी-4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-110 016

Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha
(Deemed University)
'A' Grade (By NAAC)
B-4, Qutub Institutional Area, New Delhi-110 016

दिनाङ्कः 12/02/2016

## मङ्गलसन्देशः

अतितरां मुदमावहामि विदित्वेदं यन्मुम्बापुरीस्थराष्ट्रियसंस्कृतसंस्थानपरिसरेण के.जे. सोमैयासंस्कृतविद्यापीठेन संस्कृतशास्त्रीयज्ञानविज्ञानाधारिता 'विद्यारश्मिः' इति राष्ट्रियशोधपत्रिका नवीनानां विचाराणां च प्रकाशनाय प्रकाश्यमाना इति। अनुभवविषयमिदं किमपि प्रकाशन-मवगन्तव्यमुपक्रमं विधत्त इत्यसंशयं वक्तुमुचितम्।

इदमत्युक्तं नैव यत् संस्कृतं न भाषामात्रमपितु संस्कृतं नो जीवनं भारतीयानां, जीवनोन्नायकञ्चेति। संस्कृते विद्यमानानि शास्त्राणि पुरातनकालात्प्रभृति प्रभवन्ति स्वमहत्त्वं प्राप्तमप्यत्याधुनिकविद्यासु। शिक्षाशास्त्रेऽपि संस्कृतस्याऽऽवैदिककालात्प्रतिमं योगदानं दरीदृश्यते सुतराम्। शिक्षासमन्वयः सर्वाङ्गीणविकासश्चास्ति वस्तुतः परस्परं प्रति परस्परानुगुण्यं शास्त्रसमन्वय-मनुभवसमन्वयं च। परःपूर्णं चित्राभिव्यक्तिरिव समग्रप्रकाशात्मकस्य पृष्ठभूमावेव शिक्षा परिस्फुरति। अद्यत्वे निखिलेऽपि विश्वे विश्वविद्यालयसदृशानि नानाशिक्षायतनानि शोभन्ते, प्रसारयन्ति च शिक्षामौपचारिकीं विकासाय सामाजिकानाम्। किन्तु, इदमस्माभिर्विस्मर्तव्यं भारतीयपरंपरायां न स समाजो देशो वा शोभनत्वं लभते, यस्य शिक्षायतनाद् बहिरपि अनौपचारिकशिक्षाया विस्तृतः परिधिर्नास्ति। वस्तुतस्तु एतादृशपरिधिरेव स्वदेशसभ्यताया अभिज्ञानं बीजमस्ति। मध्यकालीनयुगेऽपि इत्यस्मिन् देशेऽपि शास्त्रशिक्षायाः प्राधान्यमासीत्। परन्तु समाजे विशिष्ट-साधारण जनयोर्नित्यं संवादः प्रचलन्नासीत्। पण्डितापण्डितानां मध्ये ज्ञानपरम्पराव्यवहारवत् वैपरीत्यं न प्रतीयते स्म। न तादृशोऽवादृशो भागो देशेऽस्मिन्नासीत् यत्र रामायण महाभारत-गीता भागवत-पौराणिकाख्यानानां धर्मव्याख्या नित्यं न प्रसरति स्म। कश्चिदपि विद्या रसाञ्चितया कोमलतासम्पुटेन प्रदीयते स्म। अद्यापि सैव परम्परा भारतीयशिक्षाक्षेत्रे प्रवर्तते, गतानुगतिकोऽवर्ग च नो बौद्धिकता यस्याः प्रमाणमेव। अतस्तादृश-परम्परोद्बुद्धविद्यायाः शिक्षायाश्च सिद्धान्तानामेकैकप्रतिपाद्यवस्तु परिपक्वबुद्धीनां सुकुमारमतीनां च लाभाय पत्रिकायामस्यां विन्यस्तुं क्रियमाणोऽयं प्रयत्नोऽवश्यं प्रशस्यः। विश्वसन्नस्मि 'विद्यारश्मिः' भास्वतीकृत्य सकलं तमः सन्ततमखिलानर्थान् प्रकाशयिष्यति इत्यलमिति।

रमेशकुमारपाण्डेयः
(रमेशकुमारपाण्डेयः)

दूरभाष: 011-26851253, 26564003, Fax : 011- 26520255
E-mail : profrkpandey@yahoo.co.in, vcslbsrsv@yahoo.co.in

Scanned with OKEN Scanner

**SHRI JAGANNATH SANSKRIT VISHVAVIDYALAYA**
**SHRI VIHAR, PURI – 752003, ODISHA**

*Prof. Gangadhar Panda*
VICE-CHANCELLOR

Ph. (06752) 211663 (Off.)
251640 (Res.)
250484 (Fax)
visit : www.sjsv.nic.in
E-mail : Sanskrit.university@yahoo.com



## शिवसङ्कल्पः

सुरसरिदिव सुरभारती नित्यप्रभावा । सुरधुनी न केवलमान्तरिकं दैन्यं दूरीकरोति, अपि तु हृदयस्य जाड्यान्धकारञ्चापहन्ति। उक्तं च पण्डितराजेन –

**दरिद्राणां दैन्यं दुरितमथ दुर्वासनहृदां द्रुतं दूरीकुर्वन् सकृदुपगतो दृष्टिसरणिम् ।**
**अपि द्रागाविद्याद्रुमदलनदीक्षागुरुरिह प्रवाहस्ते वारां श्रियमयमपारां दिशतु नः ॥**

सुरधुनीव सुरभारती वैदिकसंहितात आरभ्यार्वाचीनसंस्कृतं यावन्निरवधि जगदुपकरोति । संस्कृतं पुरा सर्वेषामेव शास्त्राणां माध्यमरूपेण व्यवहृतमासीत् । अष्टादशविद्याभिः साकं चतुःषष्टिकला अप्यनया वर्णिता अभूवन् । रामायणसमये इयं कथिता भाषेति निश्चप्रचं हनुमद्-वचनाद् ज्ञातुं शक्यते –

**यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् । रावणं मन्यमाना मां सीता भीता भविष्यति ॥ ( रामा. सुन्दर. ५/१४ )**

रामायणादिकाव्यम् । परवर्तिकाले यावन्ति काव्यानि धरणीतले लब्धानि तानि रामायणोपजीव्यानि । अपरमार्षकाव्यं महाभारतमपि परवर्तियुगस्योपजीव्यमभवत् । एकलक्षपरिमितश्लोकैर्व्यासेनामितबुद्धिना एतन्माध्यमेन सर्वाणि शास्त्राण्यञ्जसा प्रतिपादितानि । तन्महिमानं वर्णयता महाभारतेनोच्यते –

**अर्थशास्त्रमिदं प्रोक्तं धर्मशास्त्रमिदं महत् । काव्यशास्त्रमिदं प्रोक्तं व्यासेनामितबुद्धिना ॥ ( महा. आदि २/८३ )**

साम्प्रतं यच्छोधकार्यं समीक्षणात्मकमध्ययनं वा दरीदृश्यते तत्तद्ग्रन्थमुररीकृत्य तथा पुरा नावलोक्यते स्म । परन्तु वेदानां वेदाङ्गानि (ब्राह्मणग्रन्थाश्च) व्याकरणे पाणिनेरष्टाध्याय्याः वार्तिकं भाष्यं च, तदनु प्रातिशाख्यानि, उपनिषदामुपरि शाङ्करभाष्यं च गहनं प्रगतं च शोधकार्यमिति वक्तुं शक्यते । काव्येषु बृहत्त्रयी नाम- भारविमाघश्रीहर्षकाव्यान्यधिकृत्य समालोचकशिरोमणेर्मल्लिनाथस्य यथाक्रमं घण्टापथ -सर्वङ्कषा-जीवातुटीकाः परमगवेषणासाध्या इति निगदितुं नास्ति शङ्कापङ्कावशेषः । पुराणेषु 'विद्यावतां भागवते परीक्षा' इति न्यायेन भागवतमनुशीलयद्भिः समालोचकैरुक्तं यद् धर्मार्थकाममोक्षरूपश्चतुर्वर्गस्तत्रैव वर्तते । यथा सतीचरितावहगाहनेन धर्मः, ध्रुवचरितेनार्थः, पृथुचरितेन कामः, पुरञ्जनचरितेन च मोक्षपुरुषार्थो यथाक्रमं समासाद्यन्ते । विष्णुपुराणमपि भगवच्छब्दस्य शोधपरकव्याख्यां विदधाति ।

**ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥ विष्णुपुराणम् - ६/५/७४**

एतादृशं शोधकार्यं स्वकुक्षौ धारयन्तीं शास्त्रीयज्ञानं मोक्षपरकं वेदादिशास्त्रं, विज्ञानपरकं च शिल्पशास्त्रं पुष्णन्तीं राष्ट्रियसंस्कृतसंस्थानाङ्गभूतो मुम्बईनगरस्थो विद्याविहारपरिसरो राष्ट्रियशोधपत्रिकां 'विद्यारश्मिः' इति नामिकामह्नाय प्रकाश्यमानयतीति निशम्य मोमुद्यते मे हृदयम् । अस्याः सफलतां कामयमानः कालिदासप्रणीतेन भरतवाक्येन शुभाशंसां वितनोमि –

**सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु । सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु ॥**

गङ्गाधरपण्डा
24/2/16

**प्रो. गङ्गाधरपण्डा**
**कुलपतिः**

Scanned with OKEN Scanner

**प्रो. एम् चन्द्रशेखरः**
प्राचार्यः
राष्ट्रियसंस्कृतसंस्थानम् ( मानितविश्वविद्यालयः )
क. जे. सोमैया संस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई - ४०००७७

Prof. M. Chandrashekhar
Principal
Rashtriya Sanskrit Sansthan
(Deemed University)
K. J. Somaiya Sanskrit Vidyapeetham
Vidyavihar, Mumbai - 400 077

# प्रास्ताविकम्

**स्थिरो भव । आशुर्भव । पृथुर्भव । - यजु. ११-४४**

अथ समस्तजगदाधारस्सकलकल्याणकृच्छ्रुतिरिति प्रामाणिकसंविद् । प्रामाणिकैश्च भगवती श्रुतिरभ्युपकृता, तदितरेषामपि तच्छ्रुतिम्प्रत्यस्त्येवादर इत्यार्यावर्तनिकायाकूतिर्नात्र प्रमाणान्तरापेक्षा ।

अतोऽध्ययनाध्यापनपरिपाट्या पुनश्शास्त्रसंरक्षणं बोभूयादिति चिन्तावृत्तेः परिणामः खलु शास्त्रशिक्षणैकरतं वैदिकन्ध्येयं परिदधानं राष्ट्रियसंस्कृतसंस्थानमिति सकलविद्वज्जातसुरभारती-समुपासकसमवायसंविदितमेव ।

नवयुगेऽस्मिन् संस्कृतविद्यायाः नवोत्थाने संस्थानस्यावदानं नितरां वर्तत एव । बृहन्नामख्य- मानितविश्वविद्यालयरूपवृक्षस्य नैकाः शाखाः परिसरत्वेन प्रथितास्सन्ति । एकादशपरिसरेष्वेतेषु प्रतिवर्षं चतुस्सहस्राधिकाश्छात्रा अधीयानाः प्रथयन्ति संस्कृतस्य तारुण्यम् ।

तत्रायं मुम्बादेव्याश्चरणयोः प्रतिष्ठापितः मुम्बईपरिसरस्सुविद्यार्थी वर्धतेतराम् । प्रतिवत्सरमिव ऐषमो वार्षिकोत्सवसन्दर्भे **विद्यारश्मिः** इति नाम्नी राष्ट्रियवार्षिकशोधपत्रिका प्रकाश्यत इति मोमुदीति नश्चेतः । शोधपत्रिकायामस्यां विद्वन्मणीनामाचार्याणां, गुरूणां, प्राध्यापकानां, शोध-च्छात्राणां, विद्यार्थिनाञ्च नानाशास्त्रनिबन्धाः ग्रथितास्सन्ति ।

शोधपत्रिकायाः यशस्वितायै स्वीयशुभसन्देशप्रेषणेनोपकृतवद्भ्यः राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिभ्यः विद्वत्तल्लजेभ्यः प्रो. पी. एन्. शास्त्रिवर्येभ्यः हार्दं कार्तज्ञ्यं व्यनक्त्ययं परिसरः ।

एवमेव शोधपत्रिकामिमां स्वीयशुभकामनाभिः फलीकृतवद्भ्यः सर्वेभ्यः नैकसंस्कृतविश्वविद्यालय कुलपतिभ्यः परिसरोऽयं स्वीयं कार्तज्ञ्यं बिभर्ति ।

शोधपत्रिकां सुष्ठु सम्पादितवते विद्वद्गणायास्तु भूरि शुभम् ।

**विद्यारश्मिरिति** पत्रिका विद्वज्जनतोषिणी शास्त्रविद्योतिनी च भूयादिति भूतगणाधिसेवितं गजाननं सम्प्रार्थये ।

**॥ समस्तसन्मङ्गलानि सन्तु ॥**

(प्रो. एम्. चन्द्रशेखरः)
**प्राचार्यः**

Scanned with OKEN Scanner

# शोधपत्रविषयक्रमः पृष्ठाङ्कनिर्देशश्च


| क्र. सं. | विषयः | लेखकः | पृष्ठाङ्कः |
|---|---|---|---|
| 1 | पालिसाहित्यपरिप्रेक्ष्ये पारमिता (एक विश्लेषणम्) | प्रो. एम्. चन्द्रशेखरः | 1 |
| 2 | संस्कृताध्यापकानां व्यक्तित्वविकासः उपायाश्च | प्रो. लोकमान्यमिश्रः | 8 |
| 3 | अपभ्रंशेषु सन्धिविचारः | प्रो. प्रकाशचन्द्रः | 17 |
| 4 | ध्वन्यालोकस्य ध्वनिलक्षणकारिकाविवेकः | प्रो. ई. एम्. राजन् | 27 |
| 5 | शिक्षामनोविज्ञानस्य उपयोगिता | प्रो. मदनमोहनझाः | 31 |
| 6 | शिवतत्त्वस्य स्फोटतत्त्वस्य चाभेदः | प्रो. बोधकुमारझाः | 40 |
| 7 | सूत्रक्रमानुसारिणी व्याकरणशिक्षणपद्धतिः | डा. देवदत्तसरोदे | 48 |
| 8 | भारतीयसंविधानस्य मूलावधारणानां विश्लेषणं समालोचनञ्च | डा. वी. एस्. वी. भास्कररेड्डी | 58 |
| 9 | Variations in the Sanskrit & the English Grammar Systems | Dr. Narayanan E. R. | 71 |
| 10 | व्याकरणशास्त्रदृष्ट्या बालभाषितस्वरूपो- भाषामनोविज्ञानम् | डा. गायत्रीमुरलीकृष्णः | 75 |
| 11 | वेदव्याख्या में निरुक्तकार का अवदान | डा. जयप्रकाश नारायण | 81 |
| 12 | प्रश्नप्रकरणाद्येकविधिप्रकौशलयोः वैशिष्ट्यम् | डा. सच्चिदानन्दमूर्तिः | 89 |
| 13 | सुश्रुतकर्मप्रकरणवैशिष्ट्यम् | डा. जयकृष्णन् नम्पूतिरि एन्. डि. | 98 |
| 14 | वास्तुशास्त्रे मुहूर्तविचारः | डा. विष्णुकुमारनिर्मलः | 108 |
| 15 | राधाचरितमहाकाव्यसमीक्षा | डा. स्वर्गकुमारमिश्रः | 113 |
| 16 | हिन्दी वाङ्मय में संस्कृत वाङ्मय का प्रभाव | डा. संजय कुमार मिश्र | 124 |
| 17 | वृत्तिस्वरूपविमर्शः | डा. मनमोहनतिवारी | 130 |
| 18 | एकविंशशताब्द्यां दूरशिक्षा | डा. सीतारामशर्मा | 134 |
| 19 | काव्य का शाश्वत प्रयोजन "चमत्कार" | डा. राजेशकुमारशुक्ल | 144 |
| 20 | Dramatic Purpose of Supernatural interventions in the plays of Kalidasa and Shakespeare | Dr. Shweta Sood | 152 |

| | | | |
|---|---|---|---|
| 21 | वृत्तिविमर्श: | डा. माधवदत्तपाण्डेय: | 160 |
| 22 | समासवृत्तिविमर्श: | डा. नवीनकुमारमिश्र: | 165 |
| 23 | विवाह में मेलापक विचार | डा. सुभाषचन्द्र मिश्र | 172 |
| 24 | शुभाशुभशकुन निर्णय | डा. आशीष कुमार चौधरी | 183 |
| 25 | वक्रोक्तिविमर्श: | डा. राकेशकुमारजैन: | 192 |
| 26 | संस्कृत एवं हिन्दी साहित्य के आधार पर रामचरितमानस में रसविचार | डा. (श्रीमती) गीतादेवी दूबे | 198 |
| 27 | शिक्षकस्य व्यक्तित्वं वैयवसायिक-क्षमतोन्नयनहेतु: | डा. कुमार: | 208 |
| 28 | लक्षणा तेन षड्विधा | डा. एम्. सुदर्शनचिपळूणकर: | 213 |
| 29 | A Comparative Study of Kalidasa's Abijnanasakuntalam and Shakespeare's – The tempest | Dr. Suman Singh | 216 |
| 30 | शिक्षक में सामाजिक दृष्टिकोण | डा. सुनील कुमार शर्मा | 223 |
| 31 | वेधशालाया: परिचय: | श्रीविजयानन्द: अडिग: | 230 |
| 32 | मराठीभाषाविज्ञाने वृत्तिविमर्श: | सुरेश चेमटे | 235 |
| 33 | परम्परानुरूपसूत्रवृत्तिस्वरूपविमर्श: | सुश्री: मौनिका बोल्ला | 241 |
| 34 | सभ्याभरणे समर्थसूत्रवृत्तिविचार: | एल्. सविता आर्या | 248 |
| 35 | Relation Between English & Sanskrit Literature | Trupti Mohanta | 252 |
| 36 | विवाहे मेलापकस्य महत्त्वम् | नूतानी ग्रहाचार्य | 268 |
| 37 | शब्दार्थसम्बन्धस्वरूप | महात्मा वीणापाणि त्रिपाठी | 275 |
| 38 | परमलघुमञ्जूषानुसारं लक्षणाखण्डनविमर्श: | ऋतम्भरा पाण्डेय | 281 |


❖❖❖

# समासवृत्तिविमर्शः

✍डा. नवीनकुमारमिश्रः

(वृत्तेरेकार्थप्रतिपादकत्वं प्रसिद्धमेव । समर्थः पदविधिरिति सामर्थ्यस्यैकार्थीभावलक्षणत्वं व्यपेक्षालक्षणत्वं च प्रसिद्धे एवेति पञ्चवृत्तिस्वरूपस्य कृत्तद्धितसमासैक-शेषसनाद्यन्तरूपस्य अन्यतमरूपसमासवृत्तेः स्वरूपमत्र रचयित्रा निरूप्यते । या समर्था सा वृत्तिरिति निबन्धे प्रस्तूयते । नैयायिका वृत्तिविषये व्यपेक्षालक्षणमेव स्वीकुर्वन्तीति रचयिताऽत्र सप्रमाणमुदाहरति ।)

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥

इदानीं मया वृत्तिस्वरूपविषये चर्च्यते - वृत्याश्रयः नित्यः शाश्वतरूपः ब्रह्मेव एकः भेदरहितः अखण्डवाक्यस्फोटात्मकः शब्दः यः ब्रह्माण्डे प्रत्यकाशं भान्ति । स च शब्दः अर्थे कथं तिष्ठति इति चिन्तायामाह हरिः:-

**नित्या शब्दार्थसम्बन्धास्तत्राम्नाता महर्षिभिः ।**
**सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः ॥ वा.प.११**

भाष्येऽपि एवं वर्तते-सिद्धे शब्दार्थसम्बन्धे (भा.वा.1) तत्र आश्रयाश्रयीभावे सप्तमी । वृत्ति आश्रयी सा चान्ताः । तद्यथा-शक्तयादि तिस्रो वृत्तयः, आकाङ्क्षादि चतश्रः वृत्तयः, कृदादि-पञ्चवृत्तयः, काशिकावृत्तिः, भाष्यवृत्तिः, सूत्रवृत्तिः इत्यादयः वृत्तयः शास्त्रेषु प्रतीयन्ते । तत्र शाब्दबोधो चौकपदार्थे संसर्गः संसर्गमर्यादया भासते इति गदाधरोक्तया विज्ञायते यत् संसर्गादिवृत्तिभिर्शाब्दबोध उत्पद्यन्ते । तत्र कारिकावल्यां एवमाह -

**पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः ।**
**शाब्दबोधः फलं तत्र शक्तिधीः सहकारणी ॥**

अनया कारिकया बोध्यते यत् विना शक्तेज्ञानाभावान्न शाब्दबोधः फलति । शब्दस्य शब्दाद् वा बोधः साब्दबोधः आकाङ्क्षादिवृत्यैव भासते ।

तत्र का नाम वृत्तिरिति ? शङ्कायां दीक्षितमहाशयः वैयाकरणसिद्धान्तकौमुद्यां सर्वशेषसमासप्रकरणे कथयति – 'परार्थाभिधानं वृत्तिः' । अभिधीयते अर्थात् उच्यते अनेन इति अभिधानम् । विग्रहवाक्यस्य यः अवयवपदार्थः तस्मात् परः अर्थः अर्थात् भिन्नः अर्थः यः विशिष्टः एकार्थः तस्य एकार्थस्य प्रतिपादिका या सा वृत्तिः ।

प्रक्रियावेलायां प्रत्येकमर्थवत्त्वेन प्रथमविगृहीतानां समुदायशक्तया विशिष्टैकार्थ प्रतिपादिका वृत्तिरिति । कैयटस्तु परस्य शब्दस्य यः अर्थः तस्य शब्दान्तरेण अभिधानं यत्र सा वृत्तिः । यथा राजपुरुष इत्यत्र राजशब्देन प्रक्रियादशायाम् अनुक्तः राजसम्बन्धिपुरुष इत्यर्थोऽभिधीयते ।

नागेशाशयः प्रधानार्थकशब्दस्योपसर्जनशब्दस्यार्थाभिधानं यत्र सा वृत्तिः । यथा समासादिषु वृत्तिव्यवहारः । एवञ्च तन्निष्ठशब्दान्तरकरणकपदार्थाभिधायकत्वं तेषां स्वाश्रयत्वेन वृत्तिव्यवहारप्रयोजकं सामर्थ्यम् । तच्च स्वार्थविशेषणकपुरुषार्थोपस्थितौ राजपदशक्तिज्ञानस्य सहकारित्वेनैव बोध्यम् ।

भाष्ये मञ्जूषायाञ्च वृत्तिर्द्विधा जहदजहदस्वार्थभेदेन । वैयाकरणमते जहत्स्वार्थवृत्तिर्नाम एकार्थीभावः अजहत्स्वार्थस्तु व्यपेक्षाभावः ।

कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्चवृत्तयो स्वीकार्याः । परार्थान्वितस्वार्थो-पस्थापकत्वाभावात् नवीनानां मते तु एकशेषवृत्तिर्नास्ति । वस्तुतस्तु द्वन्द्वापवादतया एकशेषस्यापि वृतित्वमुचितमित्यन्यत्रनुसन्धेयम् । अत्र कृत्पदेन कृदन्तः, तद्धितपदेन च तद्धितप्रत्ययघटकः समुदायः । इमाः पञ्चवृत्तय एव पदविधिशब्देन गृह्यन्ते । तासामुदाहरणम्-कुम्भं करोतीति कुम्भकारः, दशरथस्यापत्यं पुमान् दाशरथिः रामः, पीतमम्बरवान् पीताम्बरः माता च पिता च पितरौ, पठितुमिच्छति पिपठिषति ।

उपर्युक्तवृत्तिषु परार्थाभिधानं वर्त्तते यथा- कुम्भकर्मकोत्पत्तिकर्ता, दशरथस्यपुंस्त्वविशिष्टः पीताभिन्नाम्बरवान्, मातृसहितापिता, पठनकर्मकसमानकर्तृकेच्छेति । तत्र कौमुद्यामेव सर्वशेषसमासप्रकरणे आह-वृत्यर्थावबोधकं विग्रहः (विशिष्टः ग्रहः विग्रहः) स च द्विविधाः लौकिकमलौकिकञ्च । यथा-रामः रमन्ते यस्मिन् (रमु घञ्) वासुदेवः वसुदेवस्य अपत्यं पुमान् श्रीकृष्णः (वसुदेव अण्) रामौ – रामः च रामश्च, जिगमिषति – (गम् गम् सन्) गन्तुमिच्छतीति ।

मम मते तु - समर्थपदानां अर्थकथने शाब्दबोधो वा या समर्था सा वृत्तिरिति । समासत्वन्तु – सङ्केतविशेषसम्बन्धत्वेन समासपदवत्वम्, एकार्थीभावापन्नपदसमुदायविशेषो वा। समर्थपदे एव समासवृत्तिः कर्तव्यः । अत एव कृष्णं श्रितः कृष्णश्रितः इत्यादौ सामर्थ्यात्समासः, पश्य देवदत्त कृष्णं श्रितो विष्णुमित्रे गुरुकुलम् इत्यत्र असामर्थ्यात् न समासः। सम्बन्धार्थः संसृष्टार्थः सङ्गतार्थो वा समर्थः । यत्र एकः अर्थः आकाङ्क्षया अपरेण अर्थेन सह सम्बद्धः भवति सः सम्बन्धार्थः । यथा राज्ञः पुरुष इत्यादौ राज पदार्थः पुरुषपदार्थेन सह सम्बद्धः अस्ति । अत्र आभ्याम् आकाङ्क्षायां परस्परं राजपदार्थः पुरुषपदार्थेन सह सम्बद्धः अस्ति । समासादिपदविधिः समर्थपदे सम्भवति । इदञ्च सामर्थ्यं द्विविधम् - व्यपेक्षा एकार्थीभावश्च । समस्ते यत् यत् पदम् एकीभूतं, तस्य तस्य पदस्य एव शक्त्या विशिष्टार्थबोधः सम्पद्यते इति व्यपेक्षावादीनां नैयायिकादीनां मतम् ।

एतन्मते पदशक्तयै एव निर्वाहे समासे अतिरिक्ता शक्तिः न स्वीक्रियते । किन्तु शाब्दिकानां मते तु समस्ते पदे पदशक्त्यतिरिक्ता विशिष्टार्थबोधिका अतिरिक्तरूपेण समुदायशक्तिः अभिमता विद्यते । यथा नैयायिकादीनां मतानुसारम्-राजपुरुषः इति समस्तपदस्य विशिष्टार्थः अस्ति – राजनिरूपितस्वत्वाश्रयः पुरुषः अथवा स्वत्वसम्बन्धेन राजवान् पुरुषः । अत्र ङस्पदस्य स्वत्वम् अर्थः, राजन् इति पदस्य राजरूपः अर्थः । राजरूपस्य अर्थस्य निरुपितत्वसम्बन्धेन ङस् विभक्तेः स्वत्वरूपे अर्थे अन्वयः । स्वत्वस्य च आश्रयत्वसम्बन्धेन पुरुषे अन्वयः । तथाहि राजनिरुपितस्वत्वाश्रयः पुरुषः इति बोधः । अथवा ङस् विभक्तिः पदसाधुत्वमात्रम् इति मते राजपदार्थस्य आकङ्क्षया स्वत्वसम्बन्धेन पुरुषे अन्वयः । तेन स्वत्वसम्बन्धेन राजवान् पुरुषः इति विशिष्टार्थलाभः । राजपुरुष - इत्यत्र शाब्दिका समासादि पदविधिषु अतिरिक्तां समुदायशक्तिं स्वीकुर्वन्ति । अर्थात् राजपुरुषः इति यः पदसमुदायः, तस्यैव समुदायस्य शक्त्या विशिष्टार्थबोधः भवति, न तु समुदायघटकराजादिपदशक्त्या तदेवं समुदायशक्तिं ज्ञात्वा एकार्थीभावरूपं सामर्थ्यभेदम् अङ्गीकरोति ।

प्रक्रियावेलायां प्रत्येकम् अर्थवत्वेन पृथग् गृहीतानां पदानां समुदायशक्त्या विशिष्टस्य एकार्थस्य बोधनशक्तिः एव एकार्थीभावसामर्थ्यम् । अस्यां स्थितौ एव समासप्रक्रिया आरभ्यते । अत्र प्रत्येकम् राजन् ङस् पुरुष सु इति पदद्वयम् अर्थवत् अस्ति । तयोः पदयोः समुदायः, समुदाये विशेषणविशेष्यभावापन्नस्य राजसम्बन्धिपुरुषः इत्यस्य एकार्थस्य



Scanned with OKEN Scanner

बोधनशक्तिः वर्तते । असौ एव एकार्थीभावसामर्थ्यपदेन उच्यते । वस्ततुतः अयमेकार्थीभावः राजपुरुष इत्यादिवृत्तौ एव तिष्ठति, तथापि तस्याः वृत्तेः कल्पना अलौकिकविग्रहवाक्ये एव । तेन परिनिष्ठितानां पदानां राजपुरुषादीनां साधुत्वं भवति । यतो हि सिद्धानां शब्दानामन्वाख्यानं व्याकरणम् । राजपुरषादिपदं सिद्धपदम् अस्ति । एतस्य अन्वाख्यानार्थं सूत्रप्रवृत्ति अभीष्यते । समासादिविधायकसूत्राणि न तावत् प्रवृत्तानि भवितुं शक्नुवन्ति । राजपुरुषः इति पदे यः विद्यमानः एकार्थीभावः, स पूर्वः तदीये अलौकिकविग्रहवाक्ये एव परिकल्प्यते । तत्पश्चात् सामर्थ्यं दृष्ट्वा षष्ठी इत्यादिसूत्रेण समासः, ततः प्रातिपदिकत्वात् सुपो धातुप्रातिपदिकयोः इति विभक्तिलुकि नलोपे विभक्तिकार्ये च कृते राजपुरुषः इति पदं निष्पन्नम् । तदेवं समस्तरूपस्य साधनाय अलौकिकविग्रहवाक्ये एकार्थीभावकल्पना क्रियते ।

विशिष्य अपेक्षा व्यपेक्षा उच्यते । यत्र द्वयोः अर्थयोः परस्परम् अपेक्षा (सम्बन्धाः) भवति, तादृशस्य सम्बन्धार्थस्य यः सम्बन्धाः, अथवा शक्तिः तदेव व्यपेक्षासामर्थ्यम् – इति बोध्यम् । पृथगर्थोपस्थापकानां पदानाम् आकाङ्क्ष्या अन्विता बोधनशक्तिः व्यपेक्षा । व्यपेक्षासामर्थ्यम् चेदं राज्ञः पुरुषः इत्यादौ असमस्तपदे लौकिकविग्रहे तिष्ठति, एकार्थीभावसामर्थ्यं च राजपुरुषः इत्यादौ समस्तपदे तिष्ठति – इति प्रथितम् एव । व्यपेक्षायां राज्ञः पुरुषः इत्यत्र राजन् शब्दः राजरूपम् अर्थं वक्ति । पुरुषशब्दः पुरुषरूपम् अर्थं वक्ति ङिस् विभक्तिः पदसाधुत्वाय, अथवा स्वत्वमर्थः एवञ्च आकाङ्क्षया स्वत्वसम्बन्धेन राजवान्पुरुषः, अथवा राजनिरुपितस्वत्वाश्रयः पुरुषः इति व्यपेक्षापक्षीय बोधः - आकाङ्क्षा च एकपदार्थज्ञाने सति अस्य पदार्थस्य अन्वययोग्यः अर्थः कः ? इति इच्छारूपा । इयमेव आकाङ्क्षा वाक्यशक्तेः बोधिका भवति । तथाहि अभीप्सितः अर्थः आकाङ्क्षया एव समासादौ लब्धाः भवति, इति कृत्वा अतिरिक्तरूपेण विशिष्टसमुदायशक्ति एकार्थीभावरूपा न स्वीकर्तव्या, इति नैयायिकादीनां व्यपेक्षावादिनां मतम् ।

अत्रेच्यते-समासे शक्त्यस्वीकारे विशिष्टस्यार्थवत्वाभावेन प्रातिपदिकत्वं न स्यात् । अत एवार्थवत्सूत्रे भाष्ये अर्थवदिति किम् अर्थवतां समुदायोऽनर्थकः – दशदाडिमानि षडपूपाः कुण्डम – जाजिनम् । (म.भा.1/2/45)

इति प्रत्युदाहृतम् । एवञ्च राजपुरुषपदयोस्त्वन्मते प्रत्येकमर्थवत्वेऽपि समुदायस्य दशदाडिमादिवदनर्थकत्वात्प्रातिपदिकत्वानापत्तेः । न च कृत्सूत्रे समासग्रहणात्

प्रातिपदिकसञ्ज्ञेति वाच्यम् । तस्य नियमार्थताया भाष्यकृतैव प्रतिपादितत्वात् । अन्यथासिद्धिं विना नियमायोगात् । अत एव राज्ञ: पुरुषो देवदत्त: पचतीत्यादि-वाक्यस्य मूलकेनोपदंशमित्यादेश्च न प्रातिपदिकत्वम् ।

किञ्च समासे शक्त्यस्वीकारे शक्यसम्बन्धरूपलक्षणाया अप्यसम्भवेन लाक्षणिकार्थवत्त्वस्याप्यसम्भवेन सर्वथा प्रातिपदिकत्वाभाव एव निश्चित: स्यादिति स्वाद्यनुत्पत्तौ, अपदं न प्रयुञ्जीत इति भाष्यात्समस्तप्रयोगविलयापत्ते: ।

यत्तु - पदार्थ: पदार्थेन इति वृत्तस्य विशेषणयोगो न इति वचनद्वयेन ऋद्धस्येत्यादिविशेषणान्वयो न भवति, तत्तु समासे एकार्थीभावे स्वीकृतेऽवयवानां निरर्थकत्वेन विशेषणान्वयासम्भवात् फलितार्थपरम् ।

यत्तु-प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तिरिति, तन्न । उपकुम्भम् अर्धपिप्लीत्यादौ पूर्वपदार्थे विभक्त्यर्थान्वयेन व्यभिचारात् । मम तु प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेर्विशिष्टोत्तरमेव प्रत्ययोत्पत्तेर्विशिष्टस्येव प्रकृतित्वात् विशिष्टस्यैवार्थवत्वाच्च न दोष: ।

किञ्च राजपुरुषादौ राजपदादे: सम्बन्धिनी सम्बन्धे वा लक्षणा ? नाद्य: राज्ञ: पुरुष: विवरणविरोधात् । वृत्तिसमानार्थवाक्यस्यैव विग्रहत्वात् । अन्यथा तस्माच्छक्तिनिर्णयो न स्यात् । नान्त्य: राजसम्बन्धरूपपुरुष इत्यन्वयप्रसङ्गात् ।

अत्र कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपा: पञ्च वृत्तय: सन्ति । अयं विभाग: प्राचीनमतानुसारेण । नवीनास्तु-एकशेषवृत्तित्वं नेच्छन्ति । परार्थान्वितस्वार्थोपस्थापकस्यैव वृत्तित्वात्, तस्य च तत्रभावात् । अत एव समर्थसूत्राधिकारत्वपक्षे एकशेषासङ्ग्रह उक्तो भाष्ये । वृत्तिर्द्विधा जहत्स्वार्थाऽजहत्स्वार्था च । अवयवार्थनिरपेक्षत्वे सति समुदायबोधिकात्वं जहत्स्वार्थत्वम् ।

अवयवार्थसंवलितसमुदायार्थबोधिकात्वमजहत्स्वार्थात्वम् । रथन्तरं सामवेद:, शुश्रूषा सेवा इति पूर्वस्या उदाहरणम् । समासादिषु पञ्चषु विशिष्ट एव शक्तिरनत्ववयवे, रथन्तरं, सप्तपर्ण: शुश्रूषेत्यादौ अवयवार्थानुभवाभावात् ।

नैयायिकमीमांसादयस्तु-समासे शक्तिं न स्वीकुर्वन्ति । राजपुरुष इत्यादौ सम्बन्धभानार्थमेव समुदायशक्ति: स्वीक्रियते । तत्र च समुदायशक्तिमन्तरापि राजपदस्य



Scanned with OKEN Scanner

राजसम्बन्धीनि लक्षणायां सम्बन्धभानसम्भवे तदर्थं समुदायशक्तिर्न स्वीकार्या । तन्न, समासे शक्त्यस्वीकारे विशिष्टस्यार्थवत्त्वाभावेन प्रातिपदिकत्वं न स्यात्, एवञ्च दशदाडिमादिसमुदायस्य वृत्तिमत्त्वरूपार्थवत्त्वाभावान्न प्रतिपदिकत्वं भवति ।

भट्टमतानुयायिनस्तु-समासेषु न शक्तिः, न वा लक्षणा, किन्तु समासोपस्थापित-विग्रहवाक्यादेव बोधः श्लोकादान्वयवाक्यादिवत् । अत एव रामस्तत्पुरुषं बहुव्रीहिं महेश्वरः । अन्ये ऋषयः सर्वे कर्मधारयमूचिरे इत्यादौ विग्रहवाक्योपस्थित्यैव बोधः । एवं विग्रहसन्देहे बोध सन्दोहोऽप्युपपद्यते इति वदन्ति, तदपि न, विग्रहवाक्यमजानतामपि समासतोऽर्थबोधा-दर्शनाच्छक्तिमन्तरा तद्बोधानुपपत्तेः ।

किञ्च अन्यपदार्थे च सञ्ज्ञायाम् इत्यादीना उन्मत्तगङ्गम्, लोहितगङ्गम्, अरण्यतिलका इत्यादौ वाक्येन संज्ञानवगमादिह नित्यसमास इत्युक्तम् । अत्र विग्रहवाक्यात् संज्ञावगमाभावेन समासशक्तिस्वीकारमते न निर्वाह इत्यवश्यं विशिष्टशक्तिस्वीकार्यः ।

**समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत् ।**
**बहूनां वृत्तिधर्माणां वचनैरेव साधने**
**स्यान्महद् गौरवं तस्मादेकार्थीभाव आश्रितः ॥ वै.भू.का....१ इति ।**

**सन्दर्भग्रन्थसूची-**

1. परमलघुमञ्जूषा पृष्ठ सं.293, 2899
2. परमलघुमञ्जूषा-ज्योत्सनाटीका पृष्ठ सं. 203-215
3. वैयाकरणसिद्धान्तलघुमञ्जूषायाः भूमिकायाम् पृष्ठ सं.14
4. समर्थसूत्रभाष्यम् पृष्ठ सं. 328-341
5. समासस्तदव्ययीभावश्च पृष्ठ सं. 24-35
6. वैयाकरणभूषणसारस्य कारिका सं. 31
7. वैयाकरणसिद्धान्तदिग्दर्शनम् पृष्ठ सं. 356-363
8. वैयाकरणसिद्धान्तकौमुदी (मूलम्) पृष्ठ सं.98
9. प्रौढनिबन्धसौरभम् पृष्ठ सं. 142-146
10. अष्टाध्यायी 2.1.1



Scanned with OKEN Scanner

11. विद्यारश्मिः पत्रिका पृष्ठ सं. 7-11
12. सद्विद्या पत्रिका पृष्ठ सं.89-55
13. हरिप्रभा पत्रिका पृष्ठ सं. 53-57
14. सांख्यकारिका सं. 6
15. योगदर्शनम् 1/2

संविदाध्यापकः (व्याकरणविभागः)
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)
क. जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई - ७७

❖❖❖



Scanned with OKEN Scanner

ख्यातं राष्ट्रियसंस्कृतं सुमहितं संस्थानमद्याखिलं,
वाणीवैभवमातनोति नितरां राष्ट्रे चतुर्दिग्भवम्।
तत्रासौ निजगौरवेण महता सारस्वतं भासयन्,
सोमैयाभुवि भासते परिसरो मुम्बापुरे संस्थितः॥

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
NAAC द्वारा A श्रेण्यां प्रमाणितम्
(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)
क.जे.सोमैया-संस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई-77

Scanned with OKEN Scanner

ISSN : 2394-1022

# संस्कृतिशोधसन्देशः

(त्रैमासिकराष्ट्रियशोधपत्रिका)

वर्षम् : 6 अङ्कः 20 फरवरी 2017-अप्रैल 2017 पृष्ठानि : 88



प्रकाशकः

श्रीमती-मोहरीदेवीतापड़ियाशोधसंस्थानम्

जसवन्तगढ़म्-341304 (नागौरम्, राजस्थानम्)

Scanned with OKEN Scanner

# संस्कृतिशोधसन्देशः

(त्रैमासिकराष्ट्रियशोधपत्रिका)

वर्षम् - 6 | अङ्कः-20 | फरवरी 2017-अप्रैल 2017 | पृष्ठानि - 88 | ISSN : 2394-1022

✼ परामर्शदातृमण्डलम् ✼

श्री भगवतीप्रसादकणाडिया

डॉ. जगदीशनारायणविजयः

प्रो. डॉ. दामोदरशास्त्री

प्रो. शिवकान्तझाः

डॉ. सुभाषशर्मा

डॉ. प्रमोदकुमारशर्मा

डॉ. रामकुमारदाधीचः

डॉ. सुरेशशर्मा

श्री बी.के. नागरः

श्री नथमलखोखला

वैद्य रमेशकुमारपारीकः

डॉ. जितेन्द्रकुमार-अग्रवालः

✼ मुद्रकः ✼

एम.डी.प्रिन्टर एण्ड जनरल सप्लायर

जयपुरम्

मो. 9602587001

इस पत्रिका में प्रकाशित सभी लेख लेखकों के अपने निजी विचार हैं जिसका उत्तरदायित्व स्वयं लेखकों का होगा।

✼ संरक्षकाः ✼

श्री बजरंगलालतापड़िया

श्री महावीरप्रसादतापड़िया

श्री शिवरतनतापड़िया

✼ प्रधानसम्पादकः ✼

डॉ. विष्णुकान्तपाण्डेयः

सहाचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, जयपुरपरिसरः, जयपुरम्

✼ सम्पादकः ✼

डॉ. हेमन्तकृष्णमिश्रः

सेठ श्री सूरजमलतापड़ियाआचार्यसंस्कृतमहाविद्यालयः,

पो. जसवन्तगढ़-341304 (नागौरम्, राजस्थानम्)

✼ सहसम्पादकौ ✼

डॉ. परमेशकुमारशर्मा

सहायकाचार्यः

श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली

डॉ. पंकजपुरोहितः

सहायकाचार्यः (अ.)

राष्ट्रियसंस्कृतसंस्थानम् जयपुरपरिसरः, जयपुरम्

प्रकाशकः

श्रीमती मोहरीदेवीतापड़ियाशोधसंस्थानम्

जसवन्तगढ़-341304 (नागौरम्, राजस्थानम्)

फोन : 01581-230882, मो. 9461926348, 9252259688

e-mail : smdt.jwg2008@gmail.com • visit us : www.stsm.edu.in

Scanned with OKEN Scanner

# ❋ अनुक्रमणिका ❋


| | | | |
|---|---|---|---|
| १. | Learning from Life - An appraisal of 'Bhaja Govinda' Stotra | Dr. M. Jayakrishnan | ४ |
| २. | संस्कृतस्य भविष्याध्ययनम् | डॉ. के. भारतभूषण: | ७ |
| ३. | आचार्यभर्तृहरे: देशकालादिविवेचनम् | डॉ. विजयकुमारपाण्डेय: | ११ |
| ४. | वृत्तिशब्दविचार: | डॉ. जगदीशभट्ट: | १७ |
| ५. | काव्यस्योपयोगिता | डॉ. राघवकुमारझा: | २३ |
| ६. | समासशक्तिविमर्श: | डॉ. दयारामदास: | २८ |
| ७. | पर्यावरण एक गम्भीर समस्या | डॉ. विनी शर्मा | ३० |
| ८. | धर्मशास्त्रे स्त्रीणां पुनर्विवाहव्यवस्था | डॉ. सिद्धार्थशंकरदाश: | ३५ |
| ९. | विद्यालयेषु मूल्यशिक्षणम् | डॉ. आरती शर्मा | 38 |
| १०. | प्राथमिकस्तरे कथाशिक्षणविधय: | डॉ. सुनीलकुमारशर्मा | 42 |
| ११. | न पदान्तसूत्रविचार: | डा. नवीनकुमारमिश्र: | ४८ |
| १२. | अलङ्काराणां वर्गीकरणम् | डॉ. निशा | ५२ |
| १३. | अभिज्ञानशाकुन्तले पदविन्यासरमणीयता | जितेन्द्रजोशी | ५५ |
| १४. | वैदिकवाङ्मये प्रजापते: वैशिष्ट्यम् | आराधनाव्यास: | ५७ |
| १५. | शिवसागरत्रिपाठिविरचितभ्रष्टायनकाव्ये अलङ्कारयोजना | दीपकसिंहराठौड: | ६१ |
| १६. | वाक्यं रसात्मकं काव्यं | सौरभदुबे | ६७ |
| १७. | व्याकरणस्य वेदाङ्गत्वम् | डॉ. महेन्द्रशर्मा | ७० |
| १८. | प्रशासनिक प्रबंधन | योगिता शर्मा | ७३ |
| १९. | भाषाविज्ञानक्षेत्रे संस्कृतव्याकरणोधृतविचारा: (तौलनिकचिन्तनम्) | सुश्री मुग्धाचन्द्रकान्तदाते | ७७ |
| २०. | दशरथद्विवेदिप्रणीतजानकीजीवनमहाकाव्यस्य मूले परिवर्तनम् | डॉ. प्रहलादकुमारशर्मा | ८३ |
| २१. | वैयाकरणानां नये बौद्धपदार्थविमर्श: | डॉ. पङ्कजपुरोहित: | ८५ |


**पाठकेभ्य: प्रार्थनम्–** अयि भो मान्या: विद्वांस: ! इयं शोध-पत्रिका मासत्रये प्रकाशयिष्यते। अस्यै पत्रिकायै भवन्त: शोधलेखान्, वैचारिकलेखान्, कथा: विनोदवार्ता:, संस्कृतस्य विशिष्टसूचना: अन्यप्रकाशनार्हसामग्री: च सम्प्रेष्य अनुगृह्णन्तु–

दूरभाष:– मो. 9461926348 • e-mail : smdt.jwg2008@gmail.com

# सम्पादकीयम्

इह जगति संस्कृतविद्या सर्वेभ्य: प्रेरणाप्रदायिनी मार्गदर्शिका च। जना: संस्कृतं दैवीवाक् सञ्जीवनी विद्या च वदन्ति। इमामेव अधारीकृत्य जनानामुत्साहो नितरां वर्धते जायते च। अस्या: गुरुत्वादेव अस्माकं गौरवमासीदस्ति भविष्यति च। संस्कृतं मानवं सदा संस्करोति संस्कृतशिक्षाया: अध्ययनेन मानवे देवत्वं स्वयमेव समुत्पद्यते। केचन जना: संस्कृतमयवातावरणं समाजे पुनरेकवारं प्रतिष्ठापयितुं सततं प्रयतन्ते। इतरे आन्तरिकसहायका: भवन्ति। नास्ति कश्चनापि तादृश: पुरुष: य: अन्तर्वाहिनीमिमां संस्कृतधारां न सेवते। सर्वेऽपि संस्कृतभाषां सेवितुमीहन्ते संस्कृतिरपि संस्कृताश्रिता वर्तते, संस्कृतं समासाद्यैव सदाचार: पावित्र्यं च समुत्पद्यते। समाजस्योत्कृष्टविकासे संस्कृतं सुतरां महनीयां परम्परां प्रवर्तयति। संस्कृतजगति समाजे वा संस्कृतस्य सेविन: कौशलचतुष्टयस्य प्रभावपूर्णपरिचायनतत्परा: जना: समुत्पद्येरन् इति महत्त्वपूर्णम्। एकत्र ऋषिपरम्परा अवलम्बनीया अपरत्र समाजे आधुनिकतत्त्वपरा: जना: समुत्पादनीया: इत्येतद् उभयविधदायित्वनिर्वहणं संस्कृतज्ञस्य वर्तते। कोटान्यायालये अधीतसंस्कृत: कश्चन वाक्कील: आसीत् श्रीमान् रामेश्वरदयालशास्त्री स: बहुधा वदति स्म, संस्कृतक्षेत्रे द्विधा जना: वर्तन्ते, केचन संस्कृतेन जीविन: इतरे संस्कृताय जीविन:। अत्र तस्य विचारोऽयमेव आसीत् विचार्यमस्माभि: किं वयं संस्कृतेन जीवाम: तर्हि संस्कृतायापि जीवाम: वा?

पुनरेकवारं विचारणीयोऽयं विषय: वयं संस्कृतेन जीवाम: चेदपि संकल्पं स्वीकुर्म: संस्कृताय अपि जीवाम:। तेषां कथनं भवति स्म द्वितीयस्तरीयाणां संख्यया अद्यत्वे जीवति संस्कृतं शाश्वतरूपेण। तादृशानां जनानां भूरीश आवश्यकता दरीदृश्यते पन्थावाहनमपि अस्ति आयान्तु संस्कृताय जीवितुमिति। येषां विदुषामत्र लेखा: प्रकाश्यन्ते ते सर्वेऽपि विद्वांस: सुतरामभिनन्दनीया:, ते स्वीयान् लेखान् प्रदत्तवन्त: इति। तथैव तापडियाकुटम्ब: भूयोभय अभिनन्द्यते संस्कृतज्ञानामितरेषां च मार्गदर्शनं कुर्यादिति भगवन्तं गोविन्दं प्रार्थयाम:।

सम्पादक:

पदं नास्ति, अपि तु प्रत्ययोऽस्ति, लुप्तोऽकारः परपदस्थो नास्तीति अत्र स्थानिवद्भावनिषेधो नेति। तेन तस्य स्थानिवत्वे सकारः पदान्त एव न भवतीति रुत्वापत्तिर्न।

पूर्वत्रासिद्धीये न स्थानिवत् इति वार्त्तिकेनात्र स्थानिवद्भावनिषेधः प्राप्नोति, यतो हि रुत्वं त्रिपादी ततः अल्लोपस्य स्थानिवत्त्वाभावे सकार एव पदान्तः, तस्य रुत्वापत्तिः इत्याक्षेपः तत्परिहाराय शेखरकारः वदति यत् भाष्यकारेण पदे अन्तः इति विग्रहं कृत्वा स्थानिवद्भावेन रुत्वनिवारणं कृतं,तदेव ज्ञापयति 'पूर्वत्रासिद्धीये न स्थानिवत्' वार्त्तिकमिदं पदान्तविधेः भिन्नस्थले एव निषेधकमिति। ज्ञापनफलम्-महिष्मानित्यत्र षस्य झलां जशोऽन्ते[5] इति सूत्रेण जश्त्वं डकारो न भवति। महिषाः सन्त्यस्य इत्यर्थे महिशब्दात् 'महिषाच्चेति' वार्त्तिकेन डमतुपि डित्वात् टिलोपे महिष्मत्शब्दे त्रैपादिके जश्त्वे कर्तव्ये अल्लोपस्य स्थानिवद्भावो भवति, नात्र पदान्तविधौ पूर्वत्रासिद्धीये न स्थानिवत् इति निषेधो भवति। तेन षत्वस्य पदान्तत्वाभावेन जश्त्वं सिद्ध्यति।

विपूर्वक धा-धातोः 'उपसर्गे घोः किः[6] इति सूत्रेण किः प्रत्ययः। स च भावे कर्मणि च तेन विधानाद् द्वयोरप्यर्थयोः सम्भवति। तथा च भावे यदा स विधीयते तदा कर्मणोऽनुक्ततया पदान्तस्येति कर्मणि षष्ठ्या विधिशब्देन समासः, ततश्च पदचरमावयवकर्मके विधाने इत्यर्थे यस्य विधानं तस्य तत्र पदचरमावयवत्वमावश्यकमिति।

पदस्याभावरूपतया तस्यावयवत्वासम्भवेन लोपविधाने नास्य प्रवृत्तिः । कर्मण यदा किः प्रत्ययस्तदा कर्मण उक्ततया सम्बन्धमात्रे शेषषष्ठ्या पदान्तशब्दस्य विधिशब्देन समास इति पदचरमावयवसम्बन्धिविधाने इत्यर्थे षष्ठ्या अनिर्धारितसम्बन्धविशेषतया षष्ठी स्थाने योगा[7] इत्यस्य प्रवृत्तौ पदचरमावयवस्थानिके इत्यर्थे यस्य विधानं तस्य तत्र पदचरमावयव पदचरमावयवस्थानिकत्व-मात्रस्यापेक्षितत्वेन पदचरमावयवत्वस्य तदनवयवत्वस्य वा सत्वेऽपि तत्प्रवृत्या लोपेऽपि कर्तव्ये पदान्तविधौ इत्यस्य निषेधप्रवृत्तिरिति वृक्षवित्यत्र दोषापत्तेरत्र सूत्रे भावसाधनम् एव न तु कर्मसाधनमिति।

केचित्तु कर्मसाधनपक्षमपि वदन्ति। तत्पक्षे प्रथमान्तेन पदान्तशब्देन विधिशब्दस्य समासो भवति पदान्तश्चासौ विधिः इति। पदचरमावयवरूपे विधेये कर्तव्ये स्थानिवद्भावो भवतीति सूत्रार्थः। तेन लोपस्य पदचरमावयवत्वाभावात् पूर्वोक्तो दोषो न स्यात्।

**पदान्तविधिः**

पदान्तविधिं प्रत्यजादेशो न स्थानिवद् भवति- कौ स्तः, यौ स्तः, कानि सन्ति ,यानि सन्ति यत्र श्नसोरल्लोपः[8] इति सूत्रेण क्ङिति सार्वधातुकार्धातुक इति परनिमित्तकः, पूर्वविधावादेशे यणादेशे च कृते स्थानिवद् स्यात् न पदान्त इति सूत्रेण निषिध्यते।

**द्विर्वचनविधिः**

द्विर्वचनविधिं प्रत्यजादेशो न स्थानिवद् भवति-सुद्ध्य्युपास्यः,दध्यत्र,मध्वत्र इत्यत्र यणादेशः परनिमित्तकः,तस्य स्थानिवद्भावात् अनचि च[9] इति धकारस्य द्विर्वचनं न स्याद्, अस्माद् वचनाद्भवति।

Scanned with OKEN Scanner

**वरेविधिः**

वर इत्यनेन वरे योऽजादेशः, स विवक्षितः-आर्षो द्वन्द्वः वरे योऽजादेशः स पूर्वविधिं प्रति न स्थानिवद् भवति- यायावरः यातेर्यङन्ताद् यश्च यङ्[10] इति वरचि कृते अतो लोपः अष्टा.6/4/48परनिमित्तकः, तस्य स्थानिवत्वाद् आतो लोप इटि च[11] इत्याकारलोपः स्याद्,अस्माद्वचनाद् न भवति।

**यलोपविधिः**

यलोपविधिं प्रत्यजादेशो न स्थानिवद् भवति-कण्डूतिः कण्डूञ् गात्रविघर्षणे कण्डवादिगणधातुपाठ १ इति धातोः क्तिचि1[2] परनिमित्तकःलोपो व्योर्वलि[13] इति यलोपे कृते स्थानिवत्कृते यलोपो न भवति। आतो लोपः यलोपमाशङ्क्यानेन सूत्रेण स्थानिवद्भावः निषिध्यते ।

**स्वरविधिः**

स्वरविधिं प्रत्यजादेशो न स्थानिवद् भवति-चिकीर्षकः इत्यत्र 'ण्वुल्तृचौ' (पा अ 3/1/113) इति सूत्रेण ण्वुलि कृते अतो लोपः[14] परनिमित्तकः लिति प्रत्ययात् पूर्वमुदात्तमिति स्वरे कर्तव्ये न स्थानिवद् भवति इत्यर्थः ।

**सवर्णविधिः**

सवर्णविधिं प्रत्यजादेशो न स्थानिवद् भवति- शिण्ढि इत्यत्र शेष् धातोः लोण्मध्यमपुरुषैकवचने रुदादिभ्यः श्नम्[15] द्वित्वधित्वष्टुत्वजश्त्वेषु कृतेषु श्नसोरल्लोपः[16] इति क्ङिति सार्वधातुक इति परनिमित्तकः, अनुस्वारस्य ययि परसवर्णे[17] इति परसवर्णे कर्तव्ये न स्थानिवद् भवति ।अल्लोपस्य स्थानिवद्भावे कृते अनुस्वारस्य प्राप्तिर्न, किन्तु स्थानिवत्त्वस्य निषेधेन अनुस्वारे कृते 'शिं + ढि' इत्यवस्थायाम् अल्लोपस्य स्थानिवत्त्वेन परसवर्णे बाधा स्यादिति हेतोः न स्थानिवद्भावः।

**अनुस्वारविधिः**

अनुस्वारविधिं प्रत्यजादेशो न स्थानिवद् भवति-शिंषन्ति इत्यत्र नश्चापदान्तस्य झलि[18] इत्यनुस्वारे कर्तव्ये, श्नसोरल्लोपः[19] इति अकारलोपे न स्थानिवद्भावः।

**दीर्घविधिः**

दीर्घविधिं प्रत्यजादेशो न स्थानिवद् भवति- प्रतिदीव्ना, प्रतिदीव्ने इत्येतस्य भस्य अधिकृत्य तृतीयैकवचने चतुर्थ्येकवचने च अल्लोपोऽनः[20] इत्यकारलोपः परनिमित्तकः, तस्य स्थानिवद्भावेन हलि च[21] इति दीर्घत्वं भवति , अतः दीर्घविधौ न स्थानिवद्भावः।

**जश्विधिः**

जश्चविधिं प्रत्यजादेशो न स्थानिवद् भवति-सग्धिः इत्यत्र अद् धातोः बहुलं छन्दसि पा अ.2/4/39) इति घस्लृ आदेशे घसिभसोर्हलि च[22] इत्युपधालोपे झलो झलि[23] इति सकारलोपः, झषस्तथोर्धोऽधः[24] इति धत्वं उपधालोपस्य स्थानिवत्त्वनिषेधेन झलां जश् झशि[25] इति धकारस्य जश्त्वं भवति। समानाग्धिः, समानस्य सभावः। सग्धिः।

Scanned with OKEN Scanner

**चर्विधिः**

चर्विधिं प्रत्यजादेशो न स्थानिवद् भवति-जक्षतुः लिङ्-द्विवचनस्य-अदेर्घस्लृ आदेशः,गमहनजनखनघसाम् इत्युपधालोपे द्विर्वचनम्, अभ्यासादिकार्यम्। तत्रोपधालोपस्य स्थानिवत्त्वप्रतिषेधेन खरि च इति घकारस्य चर्त्वं भवति। शासिवसिघसीनां च इति षत्वम् । सूत्रेऽस्मिन् प्राप्तस्थानिवद्भावस्य निषेधः पदान्तादिविधौ वर्त्तते, विधिशब्दे भावकर्मसाधनविचारः, पदान्तपदे समासविचारः इत्यादिविषयाः प्रपञ्चिताः इति।

**सन्दर्भग्रन्थसूची**

1. पा. अ. 1/1/58
2. वैयाकरणसिद्धान्तकौमुदी पृ. सं.688
3. वैयाकरणसिद्धान्तकौमुदी पृ.सं. 80
4. पा.सू.1/4/17
5. पा.सू.8/2/39
6. पा.सू.3/3/62
7. पा.सू.1/1/49
8. पा.सू.6/4/111
9. पा.सू.8/4/47
10. पा.अ 3/2/176
11. पा.अ .6/4/64
12. पा.अ. 6/04/48
13. पा.अ. 6/1/48
14. अष्टा.6/4/48
15. पा.अ. 38/1/7
16. अष्टा 6/4/111
17. पा.अ. 8/04/47
18. पा.अ.8/03/24
19. अष्टा 6/4/111
20. पा. अ. 6/4/134
21. पा.अ.8/2/77
22. पा.अ6/4/100
23. पा. अ.8/2/26
24. पा. अ.8/2/40
25. पा.अ. 8/4/52
26. अष्टा.6/4/98
27. अष्टा.8/4/54

सहायकाचार्यः (सं.),
व्याकरणविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)
क.जे. सोमैयासंस्कृतविद्यापीठम्
मुम्बईपरिसरः, विद्याविहारः

Scanned with OKEN Scanner

Printed by : Ideal Computer Centre, Jaipur - [illegible]

ISSN No. .457 - 0729

ISSN No.

विक्रमाब्दः - २०७३-२०७४ खीस्ताब्दः - २०१६-१७

सन्दर्भिता मूल्याङ्किता च वार्षिकी शोधपत्रिका

# वाग्वै ब्रह्म

## व्याकरणशास्त्रविभागीया वार्षिकशोधपत्रिका

सृष्टौ या सर्गरूपा जगदवनविधौ पालिनी या च रौद्री,
संहारे चापि यस्या जगदिदमखिलं क्रीडनं या पराख्या ।
पश्यन्ती मध्यमाऽथो तदनु भगवती वैखरीवर्णरूपा-
साऽस्मद्वाचं प्रसन्ना विधिहरिगिरिशाराधिताऽलङ्करोतु ॥

व्याकरणविभागः

राष्ट्रियसंस्कृतसंस्थानम्

( मानितविश्वविद्यालयः )

( मानवसंसाधनविकासमन्त्रालयभारतसर्वकाराधीनम् )

NAAC द्वारा 'A' श्रेण्यां प्रत्यायितम्

क. जे. सोमैयासंस्कृतविद्यापीठम्,

विद्याविहारः, मुम्बई-७७

Scanned with OKEN Scanner

©

सर्वाधिकारः प्रकाशकाधीनः ।

पत्रिका नाम — 'वाग्वै ब्रह्म' ।
(सन्दर्भिता मूल्याङ्किता च वार्षिकी शोधपत्त्रिका)

अङ्कः — प्रथमः

प्रकाशकः — प्रो. प्रकाशचन्द्रः, व्याकरणविभागाध्यक्षः

प्रकाशनस्थलम् — व्याकरणविभागः, राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
क. जे. सोमैया संस्कृतविद्यापीठम्, मुम्बई, महाराष्ट्रम् ।

प्रकाशनवर्षम् — 2016-17

मुद्रकः — वन्दना आर्ट्स, 56, स्टेशन प्लाझा,
स्टेशन रोड, भाण्डुप (प.), मुम्बई 78 ।

संरक्षकः — प्रो. परमेश्वरनारायणशास्त्री
कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
नवदेहली ।

प्रधानसम्पादकः — प्रो. सुदेशकुमारशर्म्मा
प्राचार्य्यः, राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
क. जे. सोमैया संस्कृतविद्यापीठम्, मुम्बई, महाराष्ट्रम् ।

सम्पादकमण्डलम् —
प्रो. प्रकाशचन्द्रः, विभागाध्यक्षः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।
प्रो. बोधकुमारझाः, आचार्य्यः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।
डॉ. माधवदत्तपाण्डेयः, संविदाध्यापकः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।
डॉ. नवीनकुमारमिश्रः, संविदाध्यापकः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।
श्री. सुरेशचेमटे, शोधच्छात्रः, (S.R.F.) राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।
श्रीमती ऋतम्भरा पाण्डेयः, शोधच्छात्त्रा, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।

## पुनर्वीक्षकमण्डलम्

- प्रो. (श्रीमती) अर्चना दूबे,
  श्रीसोमनाथसंस्कृतविश्वविद्यालयः, गुजरातम् ।
- डॉ. दिलीपकुमारझाः,
  कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालयः,
  दरभंगा, बिहारः, ।
- डॉ. श्रीमती डौली जैन ।
  वनस्थली विद्यापीठ, राजस्थान ।
- डॉ. अशोकचन्द्रगौडः
  राष्ट्रियसंस्कृतसंस्थानम्, गरलीपरिसरः,
  हिमाचलप्रदेशः ।

## मूल्याङ्कनकर्तृमण्डलम्

- प्रो. मदनमोहनझाः, आचार्य्यः, शिक्षाशास्त्रविभागः
  राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई, महाराष्ट्रम् ।
- डॉ. देवदत्तसरोदे, सहायकाचार्य,
  शिक्षाशास्त्रविभागः,
  राष्ट्रियसंस्कृतसंस्थानम्, मुम्बईः, महाराष्ट्रम् ।
- डॉ. वी. एस्. वी. भास्कररेड्डी, सहायकाचार्यः,
  शिक्षाशास्त्रविभागः,
  राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई, महाराष्ट्रम् ।
- डॉ. ई. आर. नारायणन्, साहित्यविभागः,
  राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई, महाराष्ट्रम् ।

❖❖❖

Scanned with OKEN Scanner

प्रो. पी. एन्. शास्त्री
कुलपति
राष्ट्रिय संस्कृत संस्थान
(मानित विश्वविद्यालय)
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
('ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं प्रत्यायन
परिषद द्वारा मान्यता प्राप्त)

Prof. P. N. Shastry
Vice-Chancellor
RASHTRIYA SANSKRIT SANSKTHAN
Deemed to be University
(Under MHRD, Govt. of India)
(Accredited by NAAC with 'A' Grade)

RSKS/VC/MSG/2017-18/ Date – 13.04.2017

# शुभसन्देशः

'वागेव विश्वा भुवनानि जज्ञे' 'भूरिति व्याहरत् भुवमसृजत्' इत्यादिश्रुत्या वाचः उपादानकारणत्वं भुवनानां सिद्धम् । तस्मात् पातञ्जलदर्शने वागेव ब्रह्मत्वेन समुपास्यते। उक्तञ्च हरिणा – 'अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् । विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः' इति । अत्र शब्दतत्त्वात्मकस्य ब्रह्मणः प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वम् अर्थात् नित्यत्वम् 'अनादिनिधनमि' त्यनेन, व्यापकत्वम्, 'अक्षरम्' इत्यनेन, 'प्रक्रिया जगतो यतः' इत्यनेन च तस्य प्रामाण्यं प्रदर्शितं भवति । तथाहि व्याकरणदर्शनानुसारं वाग्ब्रह्म एव शब्दार्थोभयात्मकजगदाकारेण विवर्त्तते ।

वाचः ब्रह्मणश्चाभेदं ख्यापयत् 'वाग्वै ब्रह्म' इति नाम्नी प्रकाशमाना राष्ट्रियसंस्कृतसंस्थानस्यैवाभिन्नस्य मुम्बईस्थितस्य क. जे. सोमैयासंस्कृतविद्यापीठस्य व्याकरणविभागस्य सन्दर्भिता मूल्याङ्किता च वार्षिकी शोधपत्रिका व्याकरणशास्त्रस्य विकासाय, शोधशेमुष्याः संवर्धनाय च भूयादिति भगवन्तं परमेश्वरं प्रार्थये । पत्रिकाप्रकाशने संलग्नाय संपादकमण्डलाय चात्र प्रदत्तशोधलेखाय लेखकायास्मिन्नवसरे साधुवादांश्च सन्ददे ।

प. ना. शास्त्री

(प्रो. परमेश्वरनारायणशास्त्री)

Scanned with OKEN Scanner

Prof. Ark Nath Choudhary
Vice-Chancellor

**Shree Somnath Sanskrit University**
(Estd. by Government of Gujrat)
Rajendra Bhuvan Road, Veraval - 362 266
District : Gir Somnath, Gujrat, INDIA
Phone : 02876-244531 • Fax : 02876 -244417

Ref.: SSSU/VC/41/2017

Date - 31.03.2017

# शुभाशंसनम्

मुम्बईनगरस्थ-राष्ट्रिय-संस्कृत-संस्थानस्य के. जे. सोमैया संस्कृतविद्यापीठम् **वाग्वै ब्रह्म** इति नामधेयां व्याकरणशास्त्रीय-शोधपत्रिकां प्रकाशयतीति विदित्वा परममामोदमावहामि । 'वागेव विश्वा भुवनानि जज्ञे' इति श्रुतिः प्रतिपादयति । अद्वैतिनां मते यथा ब्रह्मणो विवर्तोऽयं संसारः तथैव वैयाकरणानां मते वागेव ब्रह्म, तस्मात् वाग्ब्रह्मणः संसारोऽयं नामरूपात्मकः संजायते । अत एव भर्तृहरिणा वाक्यपदीये ग्रन्थे प्रोक्तम् -

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् । विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥**

इदं शब्दतत्त्वमुत्पत्तिविनाशरहितं व्यापकं ब्रह्म मन्वानो हरिः अस्मादेव संसारस्य अर्थरूपा प्रक्रिया विवर्तभावमापद्यते इति स्वीचकार । वैयाकरणानां शब्दब्रह्मेदं स्फोटरूपं वर्तते । तत् नानारूपेण प्रस्फुट्यमानं स्वस्मिन्नेव च समाविश्यमानं सर्वदा भवति । शब्दब्रह्मणो विषये श्रुतिस्मृती अपि कथयतः -

**सूक्ष्मामर्थेनाप्रविभक्ततत्त्वामेकां वाचमभिष्यन्दमानाम् ।**
**उतान्ये विदुरन्यामिव च एनां नानारूपात्मनि सन्निविष्टाम् ॥**

एतावता वाग् ब्रह्म विद्यते इति पक्षः शास्त्रेऽनेकत्र उपस्थापितः । अत एव **वाग्वै ब्रह्म** इति अन्वर्थसंज्ञिकायाः शोधपत्रिकायाः प्रकाशने संलग्नाः प्राचार्यप्रभृतयो विद्वांसः संपादकाश्च भूरि अभिनन्द्यन्ते । सारस्वतीं सेवां कुर्वाणः परिसरोऽयं ख्यातिं लभतामिति मे शुभाशंसनं पौनः - पुन्येनेति शम् ।

(प्रो. अर्कनाथ चौधरी)

Scanned with OKEN Scanner

राष्ट्रिय संस्कृत संस्थान
(मानित विश्वविद्यालय)
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन संस्थापित)
क. जे. सोमैया संस्कृत विद्यापीठ
213, पॉलिटेक्निक भवन, (द्वितीय तल)
विद्याविहार, पूर्व, मुम्बई - 400 077
NAAC द्वारा 'A' ग्रेड प्राप्त

RASHTRIYA SANSKRIT SANSKTHAN
Deemed to be University
(Under Ministry of HRD, Govt. of India)
K. J. Somaiya Sanskrit Vidyapeeth
213, Polytechnic Building, (IInd Floor)
Vidyavihar, East, Mumbai - 400 077
(Accredited by NAAC with 'A' Grade)

# शिवसङ्कल्पमस्तु

विद्यापीठस्यास्य व्याकरणविभागस्य आचार्यप्रकाशचन्द्रवर्य्याणामाध्यक्ष्ये सन्दर्भिता मूल्याङ्किता च वार्षिकी विभागीयशोधपत्रिका **'वाग्वै ब्रह्म'** इति नामधेय यातीति परमहर्षस्य विषयतामातनोति । पत्रिकायाममुष्यां व्याकरणशास्त्रस्य संशोधनं समीक्षणञ्च भिन्नागमदर्शनपरिप्रेक्ष्ये षोडशभि: शोधपत्रै: प्रस्तुतम गवेषकाणामध्यापकानाञ्च अनुशीलनाय महान्तमवकाशं कल्पते ।

अत्रेदानीं व्याकरणविभागं, पत्रिकासम्पादने कृतश्रमं विद्वज्जनं, गवेषकसम्पादकञ्च साधुवादेन तोषयामि । **'वाग्वै ब्रह्म'** स्वनामानुगुणं शास्त्रसमुपासकानां कृते विशेषत: व्याकरणतत्त्वाभिलिप्सूनां कृते चाजिह्मां काञ्चन राजपद्धतिमाविष्कुर्यादिति भगवन्तं शिवं प्रार्थये ।

मुम्बई
20.04.2017

(प्रो. सुदेश कुमार शर्मा)
प्राचार्य

Scanned with OKEN Scanner

# सम्पादकीयम्

संस्कृतमेव प्रणायते यस्मै तादृशस्य जगत्प्रसिद्धस्यानितरसाधारणस्य भारते राष्ट्रे स्थोपस्थितस्य तत्रत्यस्थलं विलक्षणं सम्पादयमानस्य राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य मानवसंसाधन विकासमन्त्रालय-भारतसर्वकाराधीनस्य नॉकद्वारा सर्वोत्तमश्रेण्यां प्रमाणितस्य भारतराष्ट्रस्यार्थिकराजधान्यां मुम्बयां स्थितस्य तथापि संसाधने बृहतीं सिद्धिं साधयितुं ख्यातस्य क. जे. सोमैयासंस्कृतविद्यापीठस्य विद्याविहारस्य व्याकरणविभाग ऐषमः 06.03.2017 - 07.03.2017 इति व्यावहारिकप्रसिद्धावधौ दिवसद्वयव्यापिनीं राष्ट्रियशोधसंगोष्ठीं साफल्येन समायोज्य तत्रवाचितशोधपत्राणि प्रकाश्यानि सङ्कलय्य ऐदम्प्राथम्येन आई. एस्. एस्. एन्. संख्यया शोभायमानायां सन्दर्भितायां मूल्याङ्कितायाञ्च विभागीयायां शोधपत्रिकायां विन्यस्य तां तत्रभवताम्भवताम्पुरस्तात् पुरस्कुर्वाणोऽमन्दमानन्दं विन्दति।

मुनीनां प्रामाण्यस्य यथोत्तरत्वात् प्रधाने च कृतयत्नस्यावश्यं फलवत्त्वनियमात् सुरूपस्यापि मुखस्य दर्पणे एव दृश्यमानत्वात् दर्पणायितस्य पातञ्जलमहाभाष्यस्यैव समक्षं पाणिनीयं तत्त्वं समवलोकयितुं विभागोऽयं महाभाष्याद्याह्निकद्वयस्य संगोष्ठ्यां विमर्शनमुपाकल्पत, यत्र विंशतिः शोधपत्राणि प्रस्तुतानि, तेषु च षोडश पत्राणि चित्वाऽत्र प्रकाशितानि । पत्रलेखकानां येषां पत्राणि पत्रिकायां प्राकाश्यं गतानि तेभ्यो विभागोऽयं प्रकटयत्याधमर्ण्यम्, प्रकाशयति च शुभं संदिशतां मान्यानां कुलपतीनां प्रो. परमेश्वरनारायणशास्त्रिमहोदयानां, प्रो. अर्कनाथचौधरीवर्य्याणां परमौदार्य्यम्, येषां सन्देशेन सनाथायते पत्रिकेयम् । पुनर्वीक्षकमण्डलस्य मूल्याङ्कनकर्तृमण्डलस्य च विदुषामाचार्य्याणां श्रमानपि स्मरामि साम्प्रतम्, एतैः स्वधीरधिषणया सर्वाणि शोधपत्राण्येकीकृत्य वीक्षितानि मूल्यैरङ्कितानि च, तेभ्योऽपि विभागः शतशः कार्तज्ञं तनतीति । एवमेव पत्रिकाया अस्याः संरक्षकेभ्यः, प्रधानसम्पादकेभ्यः, मुद्रकेभ्यः, सर्वेभ्यः एव विहित- सहयोगेभ्यो विनम्रभावेन विभागोऽयं स्वप्रणतिततिं निवेदयते ।

पत्रिकेयं 'वाग्वै ब्रह्म' स्वकीयेन प्रकाशेन अनादिनिधनम् अक्षरं शब्दतत्त्वं प्रकाशयेत्, व्यवहारजगतः प्रक्रियामर्थभावेन विवर्तयेत्, महता देवेन शाब्दिकानां सायुज्यं भूयादिति कामयमानः सम्पादकमण्डलः पत्रिकायाः समग्राभ्युदयं प्रकामयते ।

- सम्पादकः

# शोधपत्रविषयक्रमः पृष्ठाङ्कनिर्देशश्च


| क्र. सं. | विषयः | लेखकः | पृष्ठाङ्कः |
|---|---|---|---|
| 1. | शब्दानुशासनविमर्शः | प्रो. प्रकाशचन्द्रः | 01 |
| 2. | पस्पशाह्निकग्रन्थिविमोकः | प्रो. बोधकुमारझाः | 10 |
| 3. | माहेश्वरसूत्रेषु द्विधा णकारानुबन्धविमर्शः | डॉ. अशोकचन्द्रगौडशास्त्री | 21 |
| 4. | भाष्यानुसारिशब्दार्थसम्बन्धविमर्शः | डॉ. शरदचन्द्रसाहुः | 24 |
| 5. | सैषा संस्कृते भाषितभङ्गी | डॉ. दीपेशकतिरा | 28 |
| 6. | शब्दस्य ज्ञाने धर्मः आहोस्वित् प्रयोगे | डॉ. माधवदत्तपाण्डेयः | 34 |
| 7. | णकारानुबन्धत्वविचारः | डॉ. नवीनकुमारमिश्रः | 39 |
| 8. | महाभाष्यपस्पशाह्निकस्य भाषावैज्ञानिकमध्ययनम् | श्रीसुरेशचेमटे | 45 |
| 9. | पस्पशाह्निके प्रयुक्तविशिष्टशब्दानां परिशीलनम् | श्रीमती ऋतम्भरा पाण्डेयः | 52 |
| 10. | लृकारोपदेशविमर्शः | श्रीसत्यराजरेग्मी | 58 |
| 11. | पस्पशाह्निकोक्तमन्त्रार्थविमर्शः | सुश्रीः विदुषी बोल्ला | 62 |
| 12. | सिद्धे शब्दार्थसम्बन्धे | श्री ईशान्तः | 76 |
| 13. | अथ शब्दानुशासनम् | सुश्रीराधाशर्म्मा | 82 |
| 14. | व्याकरणाध्ययनस्य मुख्यगौणप्रयोजनानि | श्रीआशिषडोगरा | 85 |
| 15. | रक्षोहागमलघ्वसन्देहा' इत्यस्य विमर्शः | श्रीचन्द्रमापौड्यालः | 92 |
| 16. | पस्पशाह्निकस्य भाषावैज्ञानिकमध्ययनम् | सुश्रीः मुग्धा चन्द्रकान्त दाते | 95 |
| • | संगोष्ठीप्रतिवेदनम् | | 102 |


❖❖❖

# णकारानुबन्धत्वविचारः

✍ डॉ. नवीनकुमारमिश्रः

णकारानुबन्धद्वयसम्बद्धं साङ्गोपाङ्गविवेचनं शास्त्रीयविचारसरण्याऽत्र निबन्धे प्रतिपादितम् । तत्र सन्देहपदार्थविवेचनम्, शक्तौ तात्पर्य्ये वा कुत्र सन्देहः? सति च तस्य का नो हानिः? 'अजर्घा' इत्यस्य ससूत्रसिद्धिः, भाष्यानुसारिविचारः, परिभाषाज्ञापनप्रकारः, कपिञ्जलाधिकरणन्यायसञ्चारः, 'यथोत्तरं मुनीनाम्प्रामाण्यमि' त्यस्य सिद्धार्थानुवादकत्वञ्च विशेषतोऽवलोकनीयतां धत्ते । (स.)

माहेश्वरसूत्रेषु सर्वेऽनुबन्धवर्णाः सकृदुच्चारिताः किन्तु णकारानुबन्धः द्विधा उच्चारितः। तत्र अइउण्, लण् सूत्रयोरुभयत्र तदुच्चारणस्य किं वा प्रयोजनम ? एकेन णकारेणैव विधिसंभवे णकारद्वयोपादानं व्यर्थं स्यादिति चेन्न । तत्र महाभाष्ये पतञ्जलिराह-

**असन्दिग्धं पराभावात् सवर्णेऽण् तपरं ह्युऋत् ।**
**ख्वोरन्यत्र परेणेण् स्याद्व्याख्यानाच्च द्विरुक्तितः ॥ म.भा.**

तथाहि अणिण्ग्रहणेषु प्रत्यासत्तिन्यायेन पूर्वेण वा स्युः भूयसामनुग्रहणाय परेणैवेति सन्देहः । सन्देहो नाम एकधर्मिकविरुद्धकोटिकधर्मद्वयावगाहि ज्ञानम् । यथा-स्थाणुर्वा पुरुषो वा। एवमेव प्रकृतावसरे अण्पदमकारादिणान्तसमुदायघटकवर्णत्रयबोधतात्पर्येणोच्चारितम् अथवा तादृश - वर्णचतुर्दशबोधतात्पर्येणोच्चारितमिति तात्पर्यरूपे संदेहः । सन्देहे निश्चयात्मकः शाब्दबोधो न स्यात् । यथा घटः घटत्वावच्छिन्ने शक्तिमान् इति ज्ञाते सति घटपदे इतरघटनिरूपिता शक्तिः उत तद्घटनिरूपिता शक्तिः इति सन्देहो न भवति तथैव आदिरन्त्येन इत्यनेन 'अ' तः 'ण' पर्यन्तं समस्तवर्णेषु अण्पदं शक्तमिति बोधे जाते सति अण्पदम् अ, इ, उ इत्यस्य बोधकम् अथवा अ, इ, उ, ऋ लृ, ए, ओ, ऐ, औ, ह, य्, व्, र्, ल् इत्यस्य बोधकम् इति सन्देहो न भवितुमर्हति। एवमेव तात्पर्येऽपि तावत् सन्देहो मन्तुं न शक्यते । यतो हि 'मदीयः पुत्रो धनवान् भवतु पण्डितश्च भवतु' इत्यत्र एक एव पुत्रः इच्छाद्वयस्य विषयो भवति तथैव एकस्मिन्नेवाणि इच्छाद्वयं भवितुमर्हति । एकेनाण्पदेन

वस्तुतस्तु तात्पर्य एव सन्देहः, ऋषीणाम् इच्छाया अप्रतिहतत्वात् । अर्थात् आचार्ये ऋषिणोच्चारितेन सकृदुच्चरितन्यायात् बोधद्वयं भवितुं नार्हति । येनाष्टाध्यायीसूत्रस्थं अण्पदं न स्यात् समवायसम्बन्धेन विद्यमानस्य तात्पर्यद्वयस्य विषयः अण्पदं यदाचार्येण एतत्तात्पर्येण उत तत्तात्पर्येण उच्चारितमिति अण्पदं दृष्ट्वा सन्देहो भवतु ।



Scanned with OKEN Scanner

तत्र शाब्दबोधे तात्पर्यनिश्चयस्य हेतुत्वात् तात्पर्यनिर्णयः आवश्यकः । तदर्थं व्याख्यानद्वारा तात्पर्य निर्णीय सन्देहोऽपाकरणीयो भवति । अणग्रहणानि च पञ्च -

ढ्रलोपे पूर्वस्य दीर्घोऽणः 6/3/110, अणुदित्सवर्णस्य चाप्रत्ययः 1/1/69, उरण् रपरः 1/1/51, केऽणः 7/4/13 अणोऽप्रगृह्यस्यानुनासिकः, 8/4/57 इत्यादिशास्त्रप्रवृत्तेरसंभवः संदेहात् । तत्र च व्याख्यानाद्विशेषप्रतिपत्तेः परिहारः । अणुदित्सवर्णस्य चाप्रत्ययः सूत्रमिदं परित्यज्य सर्वत्र पूर्वेण अइउण्घटकणकारेण प्रत्याहारः ग्राह्यः । यदि ढ्रलोपादिषु परेणाण् स्यात्तर्हि अणः स्थाने णकार सूत्रेऽजित्येव ब्रूयात् । अणुदित्सूत्रे अण् परेणैव गृह्यते ऋत उत् 6/1/111 इत्यत्र ऋति तपरकरणात् । तद्धि तपरकरणं दीर्घऋकारस्य वारणाय क्रियते । यथा पितृशब्दस्य षष्ठ्येकवचने पितुरिति रूपं तथा कृशब्दस्य षष्ठ्यैकवचने कुरिति रूपं न सम्पद्यते किन्तु क्र इत्येव । यदि अणुदित्सूत्रेऽपि पूर्वणकारेणैमाण् प्रत्याहारः सिद्ध्येत तर्हि ऋकारस्याण्त्वाभावात्सवर्णग्राहकत्वाप्राप्त्य स्वत एव दीर्घऋकारस्य ग्रहणाप्राप्तौ तद्वारणार्थं ऋत उत् 6/1/111 इत्यत्र ऋति तपरकरणं व्यर्थं स्यात् ।

अयं णकारः द्विरनुबध्यते पूर्वश्च परश्च । ढ्रलोपे पूर्वस्य दीर्घोऽणः 6/3/110-ढरेफौ लोपयतीति तथा, तस्मिन्वर्णेऽर्थाद् ढकारे रेफात्मके परे पूर्वस्याणो दीर्घः स्यात् । पूनारमते, हरीरम्यः, शम्भू राजते अणः किम् - तृढः, वृढः इत्यादौ तृहु हिंसायाम्, वृहु उद्यमने पूर्वग्रहणमनुत्तरपदेऽपि पूर्वमात्रस्यैव दीर्घः । अजर्घाः, अपास्पाः इत्यादीनां सिद्धिः । ढलोपेऽपि न दीर्घः अणि प्रत्याहारे ऋकारग्रहणाभावात् । प्रकृतसूत्रे सनदेहावसर एव नास्ति असन्दिग्धं (भा.वा.) पूर्वेण न परेण पराभावात् । (भा.वा.) नहि ढ्रलोपे परेऽणः सन्ति । आतृढः, आवृढः इत्यादौ दीर्घाभावात् । एवम् तर्हि सामर्थ्यात् पूर्वेण न परेण । यदि परेण स्यादण् ग्रहणमनर्थकम् । ढ्रलोपे पूर्वस्य दीर्घोऽच इत्येव पठेत् । उत इदमप्यनावश्यकमजादीनां स्थाने ऊकालोऽझ्- स्वदीर्घप्लुतः 1/2/27 इति शास्त्रस्वभावादेव ह्रस्वदीर्घप्लुतस्वरादीनां विधानात् । तत्र च -

**अजर्घाः**

**गृधेर्यलोपे लङि सेरिलोपे हल्ङ्यादिलोपे रपरे गुणे च ।**
**भष्भावजश्त्वे च रुरेफरत्वे ढ्रलोपदीर्घे च भवेदजर्घाः॥**

**गृधु अभिकाङ्क्षायाम्**

| | | |
|---|---|---|
| गृध + य | यङ्प्रत्ययः | धातोरेकाचो 3/1/22 |
| गृध् | यङः लुक् | यङोऽचि च 2/4/74 |
| गृध् धातु | धातुसञ्ज्ञा | सनाद्यन्त धातवः 3/1/32 |
| गृध + गृध् | द्वित्वम् | सन्यङोः 6/1/9 |
| ग + गृध् | अत्वम् | उरत् 7/4/66 |
| गर् + गृध | रपरत्वम् | उरण् रपरः 1/1/51 |

| | | |
|---|---|---|
| गर्गृध् | रुगागमः | रुग्रिकौ च 7/4/91 |
| अ गर्गृध + सिप् | अडागमः | लुङ्लङ्लृङ्क्षु 6/4/71 |
| अ जर्गृध् + स् | इकारलोपः | इतश्च 3/4/100 |
| अ जर्गृध + स् | चुत्वम् | कुहोश्चुः 7/4/62 |
| अ जर्गर्ध + स् | गुणः | गुणो यङ्लुकोः 7/4/82 |
| अ जर्घर्ध् + स् | भष्भावः | एकाचो बशो भष् 8/2/37 |
| अ जर्घर्द् + स् | जश्त्वम् | झलां जशोऽन्ते 8/2/29 |
| अजर्घर् र् + स् | रुत्वम् | दश्च 8/2/75 |
| अजर्घर् र् | सलोप | हल्ङ्याब्भ्यो दीर्घात् 6/1/68 |
| अजर्घ र् | रलोपः | रो रि 8/3/14 |
| अजर्घा र् | दीर्घः | ढ्रलोपे पूर्वस्य दीर्घोऽणः 6/3/111 |
| अजर्घाः | विसर्गः | खरवसानयोर्विसर्जनीयः 8/3/15 इति सिद्धम् । |

केऽणः 7/4/13 के परेऽणो अङ्गस्य ह्रस्वः स्यात् । यथा ज्ञका, कुमारिका, किशोरिका । अण्विषये सन्देह उत्पद्यते यद् पूर्वणकारेण उत परणकारेण पाठः? तर्ह्यत्र असन्दिग्धं पूर्वेण न परेण पराभावात् । न हि के परेऽणः सन्ति । गोका, नौका, उपानत्का, धूष्काः, गीष्काः इत्यादौ के परेऽपि न ह्रस्वः । राका, धाका इत्यत्र बाहुल्कात् न ह्रस्वः अणि प्रत्याहारे ओकारग्रहणाभावात् । सामर्थ्यात् पूर्वेण न परेण । यदि परेण स्यादणग्रहणमनर्थकम् । सूत्रे केऽच इत्येव वदेत् ।

अणोऽप्रगृह्यस्यानुनासिकः, 8/4/57 अप्रगृह्यस्याणोऽवसानेऽनुनासिको वा स्यात् । नृँरू पाहि, नृरूपाहि दधिँ, दधि मधुँ, मधु कुमारीँ, कुमारी । अत्रण्विषये सन्देह उत्पद्यते यद् पूर्वणकारेण उत परणकारेण पाठः । तर्ह्यत्र असन्दिग्धं पूर्वेण न परेण पराभावात् । न हि के परेऽणः सन्ति । कर्तृ, हर्तृ इत्यादौ अप्रगृह्यसंज्ञके अणः परे अण्प्रत्याहारे ऋकार-परेऽणः सन्ति । कर्तृ, हर्तृ इत्यादौ अप्रगृह्यसंज्ञके अणः परे अण्प्रत्याहारे ऋकार-ग्रहणाभावसामर्थ्यात् पूर्वेण न परेण अण्ग्राह्यः। यदि परेण स्यादणग्रहणमनर्थकम् । सूत्रेऽचोऽप्रगृह्यस्यानुनासिकः इति पाठः स्यात् । तदपि न पठेत् प्रकृत्या अचस्स्थानिक-ह्रस्वादिविधिः ।

उरण् रपरः 1/1/51 ऋकारस्य स्थाने योऽण् सः रपरः सन्नेव प्रवर्त्तते । आन्तरतम्यात् कृष्णर्द्धिः, तवल्कारः, कर्ता, हर्ता, किरति, गिरति, द्वैमातुरः उरदिति किम् ? खेयम्, गेयम् । प्रकृताण्विषये सन्देह उत्पद्यते यद् पूर्वणकारेण उत परणकारेण पाठः। तर्ह्यत्र असन्दिग्धं पूर्वेण न परेण पराभावात् । न हि के परेऽणः सन्ति । कर्त्रर्थम्, हर्त्रर्थमिति, सौधातकिः इत्यादौ रपरत्वाभावसामर्थ्यात् पूर्वेण न परेण अण्ग्राह्यः। यदि परेण स्यादणग्रहणमनर्थकम् । यदि कर्त्रर्थम् इत्यादौ रपत्वे क्रियते चेदपि तत्र रेफद्वयश्रवणं स्यात् । एवं हि रो तस्य रफेस्य हलो समां यमि लोपः इति सूत्रेणापि लोपासंभवः विकल्पबलात् । एवं हि रो

रि इत्यपि सूत्रं न प्रवर्तते अपदान्तत्वात् पदान्तविषयैव तस्य प्रवृत्तिः। जगृधोर्लङि् रेफस्य लोपो न स्यात् । इह तर्हि मातृणाम्, पितृणामित्यादौ न इत्वविधिः ऋकार सत्वेऽपि प्रातिपदिकत्वात् । ऋत इद्धातोः 7/1/100 ऋदन्तस्य धातोरङ्गस्य इत्स्यात् तरति । प्रकृतसूत्रे धातुग्रहणात् आचार्यप्रवृत्तिर्ज्ञापयति कर्त्रर्थम् इत्यादौ इको यणचि 6/1/77 इति सूत्रेण यणि कृते अण्प्रत्याहारे रेफाभावे नहि रेफरस्य परे रपरः। तर्हि चिकीर्षति, जिहीर्षतीत्यादावपि न प्राप्नोति उपाधायाश्च 7/1/101 इति सूत्रेण इत्वविधानमिति । एवम् तर्हि । सामर्थ्यात् पूर्वेण न परेण । यदि परेण स्यादण्ग्रहणमनर्थकम् । सूत्रे उरन्नपर इत्येव वदेत् ।

ननु परेणापि ग्रहणे उर् इत्यनेन स्थानिना दीर्घे सत्यपि ऋदित्यनेन भाव्यमानपरिभाषाप्रभावादृकारस्य स्थानित्वमादेशत्वं वाऽप्रसक्तमित्यनर्थकम् ? उच्यते । असति तपरकरणे भाव्यमानस्यैवासिद्धिः तथाहि अपूर्वनिष्पत्तेः प्रत्यासत्तिन्यायेन बाधितस्य प्रतिप्रसवे च तस्य लाघवं भवतीति। अचीकृतत्, अवीवृतत् इत्यादौ वर्णस्य विनाशे प्राप्ते स्वरूपमेवावस्थितमभ्यनुज्ञायते । सम्भवति च स्वरूपाभ्यनुज्ञानं सवर्णग्रहणे सति स्वरूपाभ्यामनुज्ञानार्थमेव सवर्णग्रहणं स्यात् । सति तु तपरकरणे सवर्णग्रहणाभावात् स्वरूपाभ्यनुज्ञानासम्भवादपूर्वविधिरेव सम्पद्यते । भाव्यमानपरिभाषासिद्ध्ये कर्त्तव्यं तपरकरणमिति ज्ञापकमेव ।

हकारादिषु ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम् वा. अत्र अनयोः सवर्णसंज्ञायाः उपसंख्यानात् ऋकारः लृकारमपि गृह्णाति, ततश्च उरण् रपरः इति लृकारस्याप्यण् रपरः स्यात्, लपरश्चेष्यते, तस्मादनुनासिकः प्रतिज्ञायते ऋकारस्याण् रपरः, लृकारस्य तु लपरः इति तवल्कारः पुनः अनुबन्धोऽपि पिनर्णकारः एवानुवध्यते

एवम्हि अणिण्ग्रहणेषु संदेहोत्पद्यते ज्ञापयितुं भवत्येषा परिभाषा व्याक्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम् । परिभा.1

अणुदित्सवर्णस्य चाप्रत्ययः 1/1/69 अविधीयमानोऽणुदिच्च सवर्णस्य संज्ञा स्यात् । अत्रण् परेण णकारेण् ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम् इति वार्त्तिकात् ऋकारस्य त्रिंशद्भेदाः भवन्ति । प्रत्ययं विना । आद्गुणः, अस्य च्वौ, यस्येति च, चुटू .लशक्वतद्धिते इत्यादिषु सवर्णग्राहकं भवति । अत्रण्विषये तु असन्दिग्धं परेण न पूर्वेण सवर्णेऽण् तपरं ह्युर्ऋत् । भा. वा. यदयं - उर्ऋत् 7/4/7 इत्यृकारे तपरकरणं तज्ज्ञापयत्याचार्यः परेऽण् न पूर्वेणाणः सन्ति ।

इण्ग्रहणेषु सन्देहः । असन्दिग्धं परेण न पूर्वेण य्वोरन्यत्र परेणेण् स्यात् । भा.वा. अचि श्नुधातुभ्रुवां य्वोरियङ्वौ 6/4/77 इत्यत्र य्वोरिति निर्देशात् यत्रेच्छति पूर्वेण संमृद्य ग्रहणे ग्रहणं तत्र करोति य्वोरिति । कथं य्वोरिति गुरुपाठः ज्ञापकमिति प्रश्ने ? विभक्तिनिर्देशे चार्धचतस्रः मात्राः प्रत्याहारग्रहणे पुनस्तिस्रो मात्रः । व्याख्यानपरिभाषायां ज्ञापयति आचार्यः । अतः व्याख्यानाच्च द्विरुक्तितः। भा.वा.

ननु यथा कपिञ्जलानालभेतेति वाक्ये बहुवचनेन सर्वेषां कपिञ्जलानामालम्भनासम्भवात् त्रयाणामेव कपिञ्जलानां पूर्वोपस्थितत्वात् ग्रहणेन वाक्यार्थरक्षा क्रियते तथैव पूर्वणकारस्य पूर्वोपस्थिकत्वेन ग्रहणमस्तु, इत्थमत्र कपिञ्जलाधिकरणन्यायेन प्रथमोपस्थितेन पूर्वणकारेणैव ग्रहणे सिद्धे न सन्देहः परिभाषा अप्यनुत्थापिता इति चेन्न निजां त्रयाणाम् 7/4/75 इत्यत्र त्रयाणामिति पदकथनेन व्याकरणे सकृदुच्चारणस्य सकृद्ग्रहणाच्छाब्दबोधः इति व्याकरणनयः। शाब्दबोधे तात्पर्यनिश्चयः हेतुः। किन्तु तात्पर्य संदेहे शाब्दबोधोऽपि संदिग्धः।

ननुबन्धद्वयोच्चारणं कथं व्याख्यानपरिभाषायां ज्ञापकं भवति ? तदुत्तरानुबन्धान्तरोच्चारणेनाऽपि सिद्धे स्वांशे चारितार्थ्याभावात्। न हि स्वांशे चारितार्थ्यमन्तरा ज्ञापकं संभवति। विपरीतार्थस्यापि ज्ञापनापत्तेः। नापीयमन्यथसिद्धेन केनचित्प्रयोजनवती। ज्ञापकाश्रयणेनैव तत्र तत्र संदेहनिवारणसंभवात् इयमनुपादेयैव परिभाषा। विपरीतार्थकल्पनानिरासायैव स्वांशे चारितार्थ्यस्यापेक्षितत्त्वेन यत्र तादृशार्थकल्पनाप्रसक्तिस्तत्रैव तदपेक्षा नान्यत्र। सा च प्रसक्तिर्यत्र सर्वथाऽसिद्धस्यैवार्थस्य शास्त्रेण बोधनं तत्रैव। स्वांशे चारितार्थ्यमन्तराऽपूर्वार्थकल्पनायां विनिगमनाविरहादर्थन्तरकल्पनापि कुतो नेति। प्रकारान्तरेण सिद्धस्यार्थबोधने न विपरीतार्थकल्पनाप्रसक्तिः। क्लृप्तस्यार्थकल्पनापेक्षया सर्वथाऽसिद्धस्यार्थकल्पनायां प्रतिपत्तिगौरवस्य सत्त्वेन तादृशशङ्कानुत्थापनेन। एवञ्चात्र व्याख्यानतोविशेषप्रतिपत्तेर्लोकसिद्धतया तमेवार्थमनुबन्धद्वयेनोच्चारणेन महेश्वरो नात्र स्वांशे चारितार्थ्यमपेक्षितम्। अत एव उभयोर्ज्ञानसामान्यार्थकत्वाऽविशेषेऽप्यभिधानस्वाभाव्यादपूर्वार्थबोधनेज्ञाधातोस्सिद्धस्यार्थस्यावगमे बुधधातोश्च वृत्तिः।

एवं तर्हि सिद्धे सति यदप्रत्ययः इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो भाव्यमानेनेत्युणादिसूत्रस्थभाष्ये ज्ञापयति अस्य यथाश्रुतार्थपरत्वमेव। अत्यल्पमिदमुच्यतेऽप्रत्यय इति, अप्रत्ययादेशटितिकिन्मित इति वक्तव्यम्। इत्युपक्रमभाष्येण तत्रत्यप्रत्ययपदस् प्रत्ययमात्रबोधकतया एव लाभेनागमादेशयोस्सवर्णग्रहणनिषेधस्य सूत्रतोऽलाभेन प्राचीनपठितभाव्यमानेनेत्यादिपरिभाषाबोधितस्य तदंशस्याप्रत्यय इत्यनेनैकदेशानुमत्या बोधनात्। तत्रापि न स्वांशे चारितार्थ्यापेक्षा। तस्याप्यर्थस्यांशतस्सूत्रक्षरैस्सिद्धतया विपरीतार्थकल्पनाया असिद्धिः। एतेन लण्सूत्रस्थभाष्यज्ञापयतीत्यस्य बोधयतीत्यर्थकरणप्रयासो मूलकृतो विफल एवेति हरिमतमपास्तम्। अपूर्वार्थ नानेन बोध्यते तद्योतनाय आवश्यकम्। अणादिपदेषु संदेहनिर्वर्त्तकं पदार्थोक्तिरूपं व्याख्यानमेव शरणमिति।

वैयाकरणसिद्धान्ते यथोत्तरं मुनीनां प्रामाण्यम् इत्येतद् वचनमेतत्परिभाषासिद्धयर्थानुवादकमेव। यथोत्तरं मुनीनां प्रामाण्यमित्यस्योत्तरोत्तरमुन्यभिप्रेतेऽर्थे पूर्वपूर्वमुनीनां तात्पर्यमित्येवार्थः, न तु पूर्वमुनीनामाप्रामाण्यमिति, अन्यथैतद्दृष्टान्तेन सम्पूर्णसूत्रस्याप्रामाण्यापत्तिः। यथोत्तरमित्यत्र प्रमाणन्तु धिण्विकृण्व्यो र च इति सूत्रेण वलोपविधानेनैव न धातुलोपार्ध-

धातुके 1/1/04 एत्यनेन गुणनिषेधात् धिनोतीत्यस्यसिद्धावकारविधानमेव । ज्ञापितं च भाष्यकारेण न धातुलोपार्धधातुके 1/1/ इत्यस्य प्रत्याख्यानात् गुणाभावाय चरितार्थम् । तथाहि लण्सूत्रभाष्यव्याख्यानेन अणुदित्सवर्णस्येतत्परिहाराय पूर्वेणाणग्रहणम् परेणेण् ग्रहणमिति बोध्यम्।

णकारानुबन्धद्वयं शास्त्रे सन्देहकारकम्, एकं विना तु पूर्वेण सर्वत्रण् ग्रहणं तथा । ऋतेऽणुदित्सवर्णस्य केऽणादौ तु सर्वदा, दीर्घादिविधानार्थं शिवसूत्रे प्रयोजितम् ।। इति दिक् ।

**सन्दर्भग्रन्थसूची-**


1. लण्सूत्रभाष्यम् पृ.सं. 143
2. अष्टाध्यायी (पं.ईश्वरचन्द्र:
3. वैयाकरणसिद्धान्तदिग्दर्शनम् -प्रो. बोधकुमारझा:
4. लण्सूत्रकाशिका
5. लण्सूत्रपदमञ्जरी
6. परिभाषेन्दुशेखरस्य प्रथमव्याख्यानतो---परिभाषा
7. परिभाषेन्दुशेखरस्य प्रथमव्याख्यानतो---परिभाषाया: सुबोधिनीटीका
8. परिभाषेन्दुशेखरस्य प्रथमव्याख्यानतो---परिभाषाया: दुर्गाटीका
9. परिभाषेन्दुशेखरस्य प्रथमव्याख्यानतो---परिभाषाया: नागेशगूढार्थदीपिका
10. वैयाकरणसिद्धान्तकौमुदी ढ्लोपादिसूत्रप्रसङ्ग:
11. लौकिकन्यायकोश:-कपिञ्जलाधिकरणन्याय:
12. पाणिनीयव्याकरणोदाहरणकोश:-अजर्था: सिद्धिविचार:
13. वैयाकरणसिद्धान्तकौमुद्या: वालमनोरमाटीकायां ढ्लोपादिसूत्रप्रसङ्ग:
14. धातुरूपनन्दिनी-जनार्दन हेगडे
15. वाचस्पत्यम् - एँण्ड्रायड मोबाईल अप्लीकेशन - प्रो.मदनमोहनझा:



संविदाध्यापकः
व्याकरणविभागः
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः),
क. जे. सोमैया संस्कृतविद्यापीठम्,
विद्याविहारः, मुम्बई ।




Scanned with OKEN Scanner

Scanned with OKEN Scanner

ISBN

# ज्योतिषरश्मिः

संरक्षकः

प्रो. परमेश्वरनारायणशास्त्री

प्रधानसम्पादकः

प्रो. सुदेशकुमारशर्मा

सम्पादकौ

डॉ. आशीषकुमारचौधरी

डॉ. अनिरुद्धनारायणशुक्लः

राष्ट्रियसंस्कृतसंस्थानम्

(मानितविश्वविद्यालयः)

**NAAC** द्वारा **'A'** श्रेण्यां प्रत्यायितम्

क. जे. सोमैया संस्कृतविद्यापीठम्

विद्याविहारः, मुम्बई - 400077

| | |
|---|---|
| Publisher | The Principle<br>Rashtriya Sanskrit sansthan<br>(Deemed University)<br>K.J.Somaiya Sanskrit Vidyapeetha,<br>Vidyavihar, Mumbai – 400 077 |
| Editorial Bord | Prof. Prakashchandra<br>Prof.Bodh Kumar jha<br>Dr.E.R.Narayanan<br>Dr.Ashish Kumar Choudhary<br>Dr.Aniruddh Narayan Shukla<br>Dr. Swarg Kumar Mishra |
| Typing | Shri. Sachin Shinde. |
| Page Desingn | Dr.Ashish kumar choudhary |
| Email | rsksmumbai@yahoo.com |
| © | Publisher |
| Edition | 2017 |
| ISBN | 978-93-85145-07-x |
| Copies | 50 |
| Price- | 400/ |
| Printed by | Shivalik 26/16,Shakti nagar<br>New delhi11007<br>Mob-9310048088<br>Ph-011-42351161 |
| Email | shivalikprakashan@gmail.com |

# विषयानुक्रमणिका


| क्र. | विषयः | लेखकः | पृष्ठाङ्कः |
| --- | --- | --- | --- |
| 1. | संहितानुसार भूगर्भजल विचार | प्रो. भारतभूषण मिश्र | 09 |
| 2. | प्रशस्ते ज्यौतिषे शास्त्रे प्रशस्तौ गुरुभार्गवौ | प्रो. हंसधरझाः | 18 |
| 3. | राजयोगानामपवादः | प्रो. ईश्वरभट्टः | 32 |
| 4. | वृष्टिविज्ञाने सूर्यप्रभावविमर्शः | डॉ. धनञ्जयमणित्रिपाठी | 45 |
| 5. | जैन ज्योतिष और सम्यग्ज्ञान का कालाचार अंग | डॉ. शुद्धात्मकप्रकाश जैन | 61 |
| 6. | नक्षत्रविज्ञानम् | डॉ. सुनीता | 67 |
| 7. | गृहनिर्माणे भूमिविमर्शस्य प्रयोजनम् | डॉ. सुभाषचन्द्रमिश्रः | 71 |
| 8. | जलविज्ञान का प्रायोगिक अध्ययन | डॉ. आशीषकुमार चौधरी | 79 |
| 9. | सद्योवर्षणविमर्शः | डॉ. स्वर्गकुमारमिश्रः | 84 |
| 10. | भारतीयज्योतिषशास्त्रे वृष्टिलक्षणम् | डॉ. अनिरुद्धनारायणशुक्लः | 89 |
| 11. | भूमिगत जल की सम्भावनाएँ | श्री जितेन्द्र कुमार गुप्ता | 95 |
| 12. | कृषिशास्त्र में वृष्टि की भूमिका | श्री किरण मिश्रा | 99 |
| 13. | जलाशयविचार किस प्रकार करें? | डॉ. अमित मिश्र | 104 |
| 14. | जलशुद्धि विचार | श्री शंकर बाबुराव आंधळे | 110 |
| 15. | भूकम्पलक्षणम् | श्री पुष्पेन्द्र रावत | 115 |


★★★

# भारतीयज्योतिषशास्त्रे वृष्टिलक्षम्

✍डॉ. अनिरुद्धनारायणशुक्ल:

विदितमस्ति ज्यौतिषशास्त्रस्य वैज्ञानिकत्वम् । ज्यौतिषशास्त्रस्य आधारभूता: नक्षत्रग्रहाश्च तदाधारिकृत्य आकाशीय घटना भौमिकीय घटना वा इति तु प्रत्यक्षमस्ति । उक्तमस्ति -

**अप्रत्यक्षाणि शास्त्राणि विवादस्तेषु केवलम् ।**
**प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ ॥**

तद् ज्यौतिषशास्त्रय त्रिषुस्कन्धेषु संहिता स्कन्ध: अन्यतमम् । अस्मिन्संहिता स्कन्धे आकाशीयघटनाया: विषय: दरीदृश्यते । तत्र आकाशीयघटनाक्रमे वृष्टि: तु अन्यतम: । जानन्ति भवन्त: अस्माकं देश: कृषिप्रधान: देश: । अत्र कृषिकर्मणि वृष्टे: अत्यन्तावश्यक: अस्ति। तत्रापि कृषिकर्मण: पूर्वमेव वृष्टिज्ञानमावस्यकं वर्तते । यतोहि ये कृषका: वर्तन्ते ते सर्वेऽपि पूर्ववृष्ट्यानुमानाधारिकृषिकर्मणि प्रवृत्ता: भवन्ति । तथा च बीजसंरक्षणादिकार्यं जलसंरक्षणादिकार्यं च कुर्वन्ति । आधुनिककाले ये खगोलीयवैज्ञानिका: मैसमवैज्ञानिकाश्च वर्तन्ते । ते तु पञ्चसप्तादिनानि-पूर्वमेव सद्योवृष्टे: संकेत: प्राप्ता:, या कृषिकर्मणि लाभप्रदानास्ति । अत: वृष्टे: पूर्वसूचना कृषिकर्मणि अत्यन्तलाभप्रदा भवति ।

वस्तुत: वृष्टे: पूर्वसूचना तथा वार्षिकवृष्टे: ज्ञानं यदि वर्ष-आरम्भे स्यात्तदा कषिकर्मण: योजना, जलसंरक्षणादियोजना अधिकलाभप्रदा भवितुं शक्यते । वृष्टे: संकेत: ददति, तेन सङ्केतेन कृषका: कथं बीजसंरक्षणादिकार्यं कृषिकर्मण: सज्जीकरणञ्च पानीयं जलसंरक्षणं वा करिष्यन्ति इति महान् प्रश्न: समाजे सम्प्रति अस्ति । अत: अस्य प्रश्नस्य समाधान: ज्यौतिषसंहितास्कन्धे एव दरीदृश्यते । उक्तमस्ति - कृषिपाराशरौ श्लोक सं. 1

**वृष्टिमूला कृषि: सर्वा वृष्टिमूलं च जीवनम् ।**
**तस्मादादौ प्रयत्नेन वृष्टिज्ञानं समाचरेत् इति ॥**

जानन्ति सर्वे समुद्रादि नद्याः जलं सूर्यरश्मयः एव वाष्परूपेण संगृह्य मेघस्वरूपे परिवर्तत्य ऊष्णवायोः संचरणेन समयानुसारं वृष्टिः करोति । परन्तु भगवान व्यासः भिन्नः सूक्ष्मः च विचारः स्थापितः । व्यासस्य विचारः केवलः सूर्यरश्मयः एव हेतुः नास्ति अपितु वृष्टेः कारणं सूर्यचन्द्रवायूरपि प्रमुखौ स्तः । वायुपुराणे भगवान व्यासः वृष्टेः कारणं स्थापितम् तद्यथा -

**आदित्यपीतं सूर्याग्नेः सोमं संक्रमते जलम् ।**
**नाडीभिर्वायुयुक्ताभिर्लोकाधानं प्रवर्तते ।**
**यत् सोमात् स्रवते सूर्य तदभ्रेष्वतिष्ठते ।**
**मेघा वायु-निघातेन विसृजन्ति जलं भूवि ।**

(वायुपुराणे 1/51/14-15)

अर्थात् सूर्यरश्मिना शोषितं जलं वाष्परूपेण अन्तिरिक्षे गच्छति तत्र चन्द्ररश्मिसंयोगेन जलम् आर्द्रं भूत्वा मेघस्वरूपे परिवर्तितः भूत्वा वृष्टिं करोति । अतः स्पष्टमस्ति सूर्यः जलं केवलं बाष्पं करोति तद्बाष्पः चन्द्ररश्मिसंयोगेन आर्द्रं भूत्वा मेघस्वरूपे परिवर्तितः भवति । तद्यथा -

**आदित्यरश्मिभिर्पीतं जलमभ्रेषु तिष्ठति ।**
**पुन पतति तद् भूमौ पूर्यन्ते तेन चार्णवा ॥**

कृषिपाराशरौ पृ. सं. 11, प्रो. रामचन्द्र पाण्डेय।

अपि च ज्योतिषशास्त्रे वृष्टिज्ञानस्य हेतवः पञ्च अवयवात्मकाः। 1. वायुः, 2. मेघः, 3. ग्रहचारः, 4. भूमिः, 5. सद्योवृश्चिश्च तत्र च वायोः अपि भेदत्रयमस्ति ।1. पावकः, 2. स्थापकः, 3. ज्ञापकश्च । पावकवायुः विभिन्नेषु दिक्षु संवह्य वृष्टियोग्यमेघान् वृष्टिहेतुः प्रेरयति ज्ञापकवायः वृष्टिं कारयति । तत्रापि वृष्टिजन्यमेघान् चतुर्धा विभाज्यते । प्रथम आवर्त्तकः द्वितीयः संवतकः, तृतीयश्च पुष्करः चतुर्थः द्रोणश्चेति । यथा

**आवर्तश्चैव संवर्त पुष्करो द्रोण एव च ।**
**चत्वारो जलदाः प्रोक्ता आवर्ताहि यथा क्रमम ॥**

कृषिपाराशरौ पृ. सं. 22, रामचन्द्र पाण्डेय।

आर्वतमेघः एकदेशे वृष्टिं करोति, संवर्तः सर्वत्रवृष्टिः करोति, पुस्करमेघः अत्यल्पवृष्टिः करोति । द्रोणमेघश्च वृष्टिः एव न करोति । तत्र कः ? मेघः अस्ति तस्य किं फलम् । यथा -

**शकाब्दः वहि्न संयुक्तं वेदभागसमावृत्तम् ।**

**शेषं मेघं विजानीयात् आवर्त्तादि यथा क्रमम् ॥**

कृषि पाराशरौ पृ. सं. 22, रामचन्द्र पाण्डेय।

अर्थात् शकाब्दे त्री युतं चतुर्णा विभाजितं शेष संख्यानुसारम् आवर्त्तादि मेघाः भवन्ति । यथा 1938 + 3 = 1941, 1941/4 = शेष - 1 अर्थात् अष्टात्रिंशदोत्तर एकोनविंशति तमे शके आर्वतनायकः मेघेशः अस्ति, अस्मिन् मेघे एकदेशे (यस्मिन् स्थाने आकाशे मेघः स्यात्तस्मिन् देशे) वृष्टिः भवति । अथ च वायुना वृष्टिज्ञानं कथं भवति ? पश्चिमोत्तरदिशोः वायुः वृष्टिसूचकः तथा तथा पूर्वयाम्ययोः दिशोः वायुः अवृष्टिसूचकः अस्ति । यदा वायुसंवहः एव नास्ति तदा वृष्ट्याभावः। उक्तम् -

**सौम्यवारूणयोर्वृष्टिरवृष्टिःपूर्वयाम्ययोः।**

**निर्वाते वृष्टिहानिः स्यात्संकुले संकुलं जलम् ।**

कृषि पाराशरौ पृ. सं. 22, रामचन्द्र पाण्डेय

पुनश्च तदवृष्टिः दिने रात्रौ वा भविष्यति तदज्ञानार्थम् पञ्चदण्डात्मकस्य वृष्टिसम्बन्धी मासस्य दिनं भवति ।

अर्थात् एकमासस्य घण्टाद्वयं एका ईकाई वा दिनस्य सूचकं भवति । तद् घण्टाद्वयस्यात्मकदिनस्यपूर्वाधे यदि उपरोक्तं - पश्चिमोत्तर-दिशोः वायुप्रवाहः स्यादत्तदा वृष्टिः दिने भवति । उत्तरार्धे यदि पश्चिमोत्तरदिशोः वायुप्रवाहः स्यादत्तदा वृष्टिः रात्रौ भवति । अर्थात् एकस्मिन् मासे त्रिंशत् दिनानि (30 दिन) अतः घण्टाद्वयस्य (2 घण्टा) एकं दिनं तदा त्रिंशतदिनस्यं - 30 X 2 = 60 घण्टा भवन्ति । त्रिंशत् विभाजिते सति । 60/30 = 2 घण्टा । एक-एकदिनस्य मानं भवति । तत्र घण्टा द्वये प्रथमा घण्टा दिनस्य सूचकः द्वितीया घण्टारात्रेः । अतः प्रथमहोरायां वायुः चलति तदा दिने द्वितीयहोरायां रात्रौ वृष्टिः भवति ।

**वृष्टिगर्भलक्षणानि -**

ज्येष्ठमासस्य आषाढास्यादर्शतिथौ दिवा रात्रौ वा आकाशे मेघे दृष्टे सति वृष्टिकालेऽपि वृष्टिः न भवति । नात्र संशयः । उक्तमस्ति - नारदीयमयूरचित्रके -

ज्येष्ठमासे दर्शतिथौ रात्रौ मेघः प्रदृश्यते ।
दिवसे वायना वृष्टिर्जायते नात्र संशयः ॥

**प्रश्नमाध्यमेन चन्द्राधारितवर्षाज्ञानम्**

वर्षाज्ञानप्रश्ने चन्द्र जलचरराशीस्थः लग्ने स्यात् अथवा शुक्लपक्षे जलचरराशौ स्थित्वा केन्द्रेषु (चतुर्थ-सप्तम-दशम) स्थितः चन्द्रः शुभग्रहेणदृष्टः स्याततदा शीघ्रैव अधिकवृष्टिः भवति । यदि पापग्रहण दृष्टः चन्द्रः स्यात्रदा अल्पवृष्टिः भवति । उक्तमस्ति वृहत्संहितायां सद्योवर्षणाध्याये श्लोक ।

**वर्षाप्रश्ने सलिलनिलयं राशिमाश्रित्य चन्दो लग्नं यातो भवति यदि वा केन्द्रगः शुक्लपक्षे ।**
**सौम्यै दृष्टः प्रचरमुदकं पापदृष्टोऽल्पमम्भः प्रावृट्काले सृजति न चिराच्चन्द्रवद्भार्गवोऽपि ॥**

**लतादिभिः वृष्टिज्ञानम् -**

यदि लतानां नूतान पत्राणां मूखमूर्ध्वं स्यात् अथवा धूलिभिः (रेणूभिः) खगाः स्नानं कुर्युः अथवा सरीसृपाः (कृतिजातयः सर्पादि) तृणस्य प्रान्तभागे स्थितः स्यात्तदा शीघ्रवर्षा भवति । उक्तमस्ति -

**वल्लीनां गगनतलोन्मुखाः प्रवालाः स्नायन्ते यदि जलपां सुभिर्विहङ्गा ।**
**सेवन्ते यदि च सरीसृपास्तृणाग्राण्यासन्नो भवति तदा जलस्य पातः ॥**

वृहत्संहिता सर्धोवर्षणाध्यायः ।

**मेघगर्जनेन वृष्टिज्ञानम् -**

रात्रौ मेघगर्जनं स्यात् दिवा रूधिरस्य समानदण्डाकारविद्युत दृष्टः स्यात् तथा पूर्वदिशः शीतलवायुः प्रवहेत् तदा वर्षा भवति । उक्तमस्ति - वृहत्संहितायां सद्योवर्षणाध्यायः ।2।

**स्तनितं निशि विद्युतो दिवा रूधिरनिभा यदि दण्डवत् स्थिताः ।**
**पवनः पुरतश्च शीतलो यदि सलिलस्य तदाऽगमो भवेत् ॥**

एवमेव आषाढकृष्णपक्षस्य पञ्चमीतिथौ मेघश्छन्न चन्द्रः ।
दृष्टौ आगच्छेत् तदा वृष्टियोगः भवति ।

यथा - आषाढे कृष्णपक्षे च यष्टभ्यां रजनीपातेः ।
मेघः मध्ये च संयाति तदा पृथ्वीजलाकुला ।

मयूरचित्रक षष्ठोऽध्यायः 4

**सद्योवृष्टिलक्षणम् -**

प्रभातकाले सूर्यनिकरकिरणे तीक्ष्णता स्यात् पीतवर्ण रश्मयः स्युः मेघः स्निग्धः तथा श्यामवर्णीयः स्यात्तदा शीघ्रवृष्टिः भवति ।

**प्रातः काले पीतरश्मिर्दुनिरीक्ष्यो भवेद्रविः ।**
**स्निग्धवैदूर्यकान्तिश्चैन्नेद्यो वृष्टिः प्रद स्मृतः ॥**

मयूरचित्रके अ. षष्ठः 6

**अन्यदप्याह**

यदि वर्षाकाले मध्याह्ने सूर्यरश्मयः प्रचण्डः दुःसहः वा स्यात् तथा सूर्यप्रभा तप्तवर्णः सदृशः स्यात्तदा तद्दिने वृष्टिः भवति । यथा

**प्रावृट्काले यदा सूर्यो मध्याह्ने दुःसहो भवेत् ।**
**तद्दिने वृष्टिदः प्रोक्तोद्रतुस्वर्णसमप्रभः ॥**

मयूरचित्रके अ. 5, श्लो. 7

**अन्यदप्याह**

यदि पवनः न वहेत् जले मत्स्याः त्वरन्तः अधोभागे गच्छेयुः मंडूकः ध्वनिः करोति तदा तत्कालैव अतिवृष्टिः संभवति ।

**न यदा वातिं पवनश्चस्थलं (न्नं न्नं) यान्ति झषादयः ।**
**शब्दं कुर्वन्ति मण्डूकास्तदा (स्यात्) वृष्टिरनुत्तमा ॥**

मयूरचित्रके, अ.5, श्लो. 7

**यदा श्वानः मार्जाराः श्वनैः भूमौ गर्त्तं कुवन्ति ।**
**लौहधातुना दुर्गन्धानुभूतिः स्यात्तदा जलवृष्टिः भवति ।**

**यथा**

**नखैर्लिखति मार्जाराः पृथिवीं च यदा भृशम् ।**
**लोहानास्मलनिचयो विस्रगन्धा यदा भवेत् ॥**

मयूरचित्र, अ. 5, श्लो. 10

**उपसंहार**

वस्तुतः विषयोऽयं बहुरूचिकरोऽस्ति । न तु मनुष्याः अपितु सृष्टेः विभिन्न-प्राणिनोऽपि वृष्टिकल्पना कुर्वन्ति । यथा वृक्ष-गुल्म-लता-पिपिलिका-सर्प-सरिसृप-गौ-वृषभ-कुक्कुरादयेभ्यो प्रभृति पर्वताः । ऋषयोऽपि एतदनुभवं प्रसूतवृष्टिज्ञानं सृष्टेः हित-आकांक्षया ग्रन्थेषु लिपिकृत-कृतवन्तः । वृष्टिविज्ञानानुकल्पितं मनुसहितं महर्षि गर्गः, अत्रिः, कश्यपः, वशिष्ठादि ऋषिभिः योगदानं कृत्वा ज्योतिर्विज्ञानदृष्ट्या कल्पितमस्ति । अतः उपरोक्तवृष्टिविषयकतथ्येन मानवानां जीवानां पशुपक्षिणां-कृषकानां वृष्टिविषयकसमाधानाय हिताय वा प्रस्तुतमस्ति शोधप्रबन्धोऽयम् । येन माध्यमेन वृष्ट्याकांक्षिताः वृष्टिकालज्ञानान्विता भवेयुः इति मे मतिः ।

संविदाध्यापक ( ज्योतिष )
राष्ट्रियसंस्कृतसंस्थानम् ( मा.वि. )
क. जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहार, मुम्बई ।

★★★






Shivalik Prakashan
27/16, Shakti Nagar, Delhi-110007
Ph./Fax : 011-42351161
E-mail: shivalikprakashan@gmail.com
Website : shivalikprakashan.com

PRICE-400/-

aSBN 938514507-X

ISSN : 2250-1193

Year 6, No. 6
July-September, 2016

# अनुकृति

An International Refereed Research Journal

Reg. No. 694/2009-10

ISSN : 2250-1193

# अनुकृति

**An International Refereed Research Journal**

वर्ष–6, अंक–6

जुलाई–सितम्बर, 2016

प्रधान सम्पादक

प्रो. विजय बहादुर सिंह

हिन्दी विभाग

काशी हिन्दू विश्वविद्यालय

वाराणसी

सम्पादक

डॉ. रामसुधार सिंह

पूर्व अध्यक्ष, हिन्दी विभाग

उदय प्रताप स्वायत्तशासी महाविद्यालय

वाराणसी

प्रकाशक

सृजन समिति प्रकाशन

वाराणसी (उ.प्र.)

**संरक्षक मण्डल**

**प्रो. राम विनोद सिंह :** पूर्व कुलपति, जयप्रकाश विश्वविद्यालय, छपरा, बिहार
**प्रो. जोखन सिंह :** पूर्व कुलपति, विक्रम विश्वविद्यालय, उज्जैन (म.प्र.)
**प्रो. रामजनम सिंह :** पूर्व कुलपति, महात्मा गांधी काशी विद्यापीठ, वाराणसी
**प्रो. शिव सहाय पाठक :** पूर्व अध्यक्ष, हिन्दी विभाग, विक्रम विश्वविद्यालय, उज्जैन (म.प्र.)
**प्रो. नूरजहाँ बेगम :** पूर्व अध्यक्ष, हिन्दी विभाग, हैदराबाद विश्वविद्यालय, हैदराबाद (आन्ध्र प्रदेश)
**प्रो. नीलम सर्राफ :** हिन्दी विभाग, जम्मू विश्वविद्यालय, जम्मू
**प्रो. बंशीधर लाल :** पूर्व अध्यक्ष, हिन्दी विभाग, मगध विश्वविद्यालय, बोधगया, बिहार

**सम्पादकीय विशेषज्ञ समिति**

**प्रो. आर. सीता राम :** हिन्दी विभाग, डरबन विश्वविद्यालय, साउथ अफ्रीका
**प्रो. आरीफ नजीर :** अध्यक्ष, हिन्दी विभाग, अलीगढ़ मुस्लिम विश्वविद्यालय, अलीगढ़
**प्रो.. आर.के. शाह :** अर्थशास्त्र विभाग, त्रिभुवन विश्वविद्यालय, कीर्तिपुर, काठमाण्डु, नेपाल
**प्रो. जगदीश सिंह :** भूगोल विभाग, काशी हिन्दू विश्वविद्यालय, वाराणसी
**प्रो. के.एम. पाण्डेय :** अंग्रेजी विभाग, काशी हिन्दू विश्वविद्यालय, वाराणसी
**प्रो. शिव कुमार मिश्र :** हिन्दी विभाग, महात्मा गांधी काशी विद्यापीठ, वाराणसी
**डॉ. एन.सी. यादव :** प्राचार्य, राजकीय महाविद्यालय, डबराला, गुन्नौर, बदायूँ
**डॉ. अरुण कुमार :** अध्यक्ष, हिन्दी विभाग, एम.एस. स्नातकोत्तर महाविद्यालय, मोतीहारी, पूर्वी चम्पारण, बिहार
**डॉ. सरिता तिवारी :** राजनीतिशास्त्र विभाग, जी.एस. कालेज, जमशेदपुर
**डॉ. विद्याशंकर सिंह :** हिन्दी विभाग, मोतीलाल नेहरु कालेज, नई दिल्ली
**डॉ. अभिजीत सिंह :** प्रबंधशास्त्र विभाग, काशी हिन्दू विश्वविद्यालय, वाराणसी
**डॉ. अनिल कुमार सिंह :** प्राचीन इतिहास, उदय प्रताप स्वायत्तशासी महाविद्यालय, वाराणसी
**डॉ. सुनील कुमार विश्वकर्मा :** असिस्टेन्ट प्रोफेसर, ललित कला विभाग, महात्मा गांधी काशी विद्यापीठ, वाराणसी
**तबस्सुम :** अमर उजाला 'दैनिक', वाराणसी

**प्रबंध सम्पादक**
मुश्ताक अहमद

© प्रकाशक

**ANUKRITI (An International Refereed Research Journal)** Published Quarterly

**कार्यालय :**
म0नं0 498, ककरमत्ता (दक्षिणी), पोस्ट–डी.एल.डब्ल्यू., जिला–वाराणसी–221004 (उ.प्र.), भारत
संपर्क सूत्र : 9415388337, 8303968456
**Email :** anukriti193@rediffmail.com, anukriti193@yahoo.com

नोट :– सभी पद अवैतनिक। प्रकाशित लेखों एवं उद्धरणों में लेखकों के अपने विचार हैं। लेखों एवं उद्धरणों से सम्बन्धित किसी भी वाद–विवाद के लिए लेखक स्वयं जिम्मेदार होगा। सम्पादक, प्रकाशक एवं अनुकृति परिवार के किसी भी सदस्य की कोई जिम्मेदारी नहीं होगी। किसी भी विवाद का जूरिसडिक्शन वाराणसी होगा।

⇨ चन्द्रवर्णनम् 141-145
**डॉ0 अनिरुद्ध नारायण शुक्ल**

⇨ राष्ट्रीयता की भावना के प्रेरक : राष्ट्रपिता महात्मा गांधी 146-147
**प्रो. (डॉ.) अमर ज्योति सिंह, प्रो. (डॉ.) अमर बहादुर सिंह एवं डॉ. अमर नाथ सिंह**

⇨ न्यायशास्त्रे परामर्शविचारः 148-150
**राजेशकुमारसिंहः**

⇨ साहित्यशास्त्र में श्रृंगाररस की धर्मप्रासङ्गिकता 151-152
**देवात्मा दुबे**

⇨ श्रुत्यादीनां प्रामाण्यविचारः 153-154
**डॉ0 रवीन्द्र कुमार पाठक**

⇨ मथुरा की बौद्ध कला के उद्भव की धार्मिक पृष्ठभूमि 155-158
**डॉ0 राधवेन्द्र प्रताप सिंह**

⇨ इन्द्रियाणां प्राप्यकारित्वविमर्शः 159-162
**डॉ0 ज्ञानेन्द्र सापकोटा**

⇨ काशी का सन्त साहित्य 163-166
**पूजा राय**

⇨ सांख्ययोगतत्वानां संक्षिप्तानुशीलनम् 167-168
**डॉ0 बीरबल पाण्डेय**

⇨ अभिज्ञानशाकुन्तलम् में कालिदास की अलंकार–योजना 169-174
**गोपाल यादव**

⇨ भारत की प्राचीन एवं मध्यकालीन शिक्षा व्यवस्था 175-178
**डॉ0 मानसी पाण्डेय**

⇨ नवजागरण की अवधारणा 179-182
**परिमल प्रधान**

⇨ मेहरुन्निसा परवेज़ की जीवन दृष्टि 183-186
**डॉ0 आसिया बानो**

⇨ कृष्णा अग्निहोत्री की आत्मकथाओं में चित्रित नारी 187-190
**डॉ0 शोभा श्रीवास्तव**

⇨ मंचीय कवि शिवमंगल सिंह 'सुमन' : जीवन और साहित्य 191-192
**प्रमोद कुमार**

⇨ खाद्य सुरक्षा : पोषण और जनस्वास्थ्य 193-196
**यासमीन बानो**

⇨ पं0 रामनरेश त्रिपाठी : एक बहुआयामी व्यक्तित्व 197-198
**अजय कुमार चतुर्वेदी**

⇨ राजनीति का अपराधीकरण और चुनाव आयोग 199-202
**अम्बुज कुमार**

⇨ ब्रज चित्रकला पर ब्रज संगीत का प्रभाव 203-206
**अर्चना कुमारी**

# चन्द्रवर्णनम्

डॉ0 अनिरुद्ध नारायण शुक्ल*

सृष्ट्यारम्भकाले यदा केवलं शून्यमेवासीत् तदा केन प्रकारेण केन क्रमेण च सृष्टिरचना जाता इति उक्तमन्त्रेषु वर्णितं वर्तते। तेषु सूर्यचन्द्रयोः सृष्टिः ऐककालावच्छेदेन ब्रह्मणा तथैव कृता यथा पूर्वकल्पे कृता आसीत्। चन्द्रे प्रकाशकत्वं ब्रह्मणः सर्वभूतगतमनसः सकाशाज्जातम्। अतएवोक्तं. "चन्द्रमा मनसो जातः"[1]

चन्द्रगोलविमर्शेतिनामकस्वग्रन्थे प्रो. रामचन्द्रपाण्डेयवर्यैः चन्द्रोत्पत्ति–विषये प्रमाणं दत्तम्।[2]

चन्द्रः पृथिव्या एकमङ्गमेवास्ति। आरम्भकाले भूमिरियं वाष्परूपेणा–ऽऽसीत्। शनैः शनैरियं शैत्यं जगाम। शैत्यं प्राप्य वाष्पः तरलरूपे परिवर्तितः। पश्चाद् अस्योपरिभागे प्रथममेकं दृढमास्तरणं (Layer) जातम्। सूर्यप्रभावेण तदानीं पृथिव्या उपरि तीव्राप्लावाः (Tides) समुद्भूताः। तदानी भूमेर्गतिरतीव तीव्रा आसीत्। प्रमाणितमिदं यत् मूलपृथ्वी (यदा चन्द्रोत्पत्तिर्नाऽभवत्) वर्तमानपृथिव्यपेक्षया षड्गुणिताधिकवेगेन भ्रमणमकरोत्। अर्थात् सा चतुर्थघण्टात्मकेन कालेन स्वाक्षभ्रमणं प्रापूरयत्। तदानी सूर्याकर्षणवशाद् घण्टाद्वयान्तरेण प्लावानामागमनमभवत्। ते प्लावा आधुनिकप्लावपेक्षया अतीव दीर्घा आसन् पृथिव्या दोलनकाले प्लावस्याऽऽवर्तकाले च समानान्तरेण घण्टाद्वयात्मकेन कालेनानुनादक्रिया उत्पन्ना जाता। अनुनादक्रियया भूमौ अत्यन्तविशालोच्चप्लावाः समुत्पन्ना अभवन्। एवं बहुवर्षाणि यावत् प्लावा उत्पन्ना अभूवन्। परिणामतः तरला पृथ्वी दीर्घा जाता। दीर्घीभवनक्रियाया वर्द्धनेन पृथिव्यारियं काया स्थिरतां तत्याज। अर्थाद् इयं पृथ्वी स्वशरीरस्य रक्षणे असमर्था जाता, परिणामतः पृथ्वी भागद्वये विभक्ता अभूत्। तस्या एकः प्रमुखभागः इयमस्माकं पृथ्वी। अपरश्च शेषो भागश्चन्द्रोऽभूत्। एवं चन्द्रस्योत्पत्तिर्जाता। जार्जगैमो (George Gamow)– महोदयेनापि लिखितं वर्तते यच्चन्द्रस्योत्पत्तिः पृथिव्या एव जाता। तेषां महानुभावानां विचारस्यात्र केवलं सारांश एव प्रस्तूयते. "अत्यन्त प्राचीनकाले चन्द्रः पृथिव्या धरातलस्य तस्यामेव दिशि निष्क्रियरूपेण स्थिर आसीत्, यस्मात् स्थानात् स्वमातुः पृथिव्याः शरीरात् सूर्येणोत्पादितानां प्रबलप्लावानां वेगाद्[3] बहिरभूत्। वयं साधिकारं वक्तुं शक्नुमो यदयं चन्द्रोऽस्माकं पृथिव्या उपग्रह एवास्ति। अस्य जन्मस्थानविषये इये कल्पना वर्तते यच्चन्द्रः प्रशान्तमहासागराद् उद्भूत आसीत्। अस्या कल्पनायाः प्रमाणमपि विद्यते यत् प्रशान्तसागरस्य निम्नप्रदेशाश्चन्द्रस्य मातुः पृथिव्या दृढतरचर्मणः उपरि विशालक्षतादन्यत् न किञ्चिदस्ति। अयमेव एकः सुदृढो विमर्शः पृथिव्याः प्रथमप्रसवस्य एकस्या एव दुहिताया विषये च।[4]

**पुराणादिषु चन्द्रवर्णनम्** - पुराणा– ख्यानके अतिशयोक्तिवर्णनया तत्र सामान्यजनानां भ्रान्तिः समुत्पद्यते तथापि प्रयत्नतो विचारणया वास्तविकार्थस्य ज्ञाने जाते तत्तदाख्याने नास्ति सन्देहलेशावसरोऽपि। अत्र पौराणिकानि द्वित्राण्युदारहणानि प्रस्तुत्य तत्र तत्रागता भ्रान्तिर्वार्यते। पुराणेषु कथा वर्तते यद् दक्षप्रजापतेः सप्तविंशतिकन्यानां चन्द्रेण सह विवाहोऽभूत्। तत्र चन्द्रः सर्वापेक्षया रोहिण्यामेवाऽऽसक्तः। तेन ताः सर्वा अपि विमनसो भूत्वा स्वपितरं दक्षमिमं वृत्तं निवेदयामासुः। दक्षेण मुहुर्मुहुर्वार्यमाणोऽपि चन्द्रो यदा रोहिणीविषयकं रागं न तत्याज तदा त्वं यक्ष्माभिभूतो भवेति दक्षस्तं शशाप। क्वचिच्च "कुष्ठरोगाभिभूतो भव" इत्युदन्तं वर्तते।[5]

अत्र नक्षत्राण्येव दक्षप्रजापतेः कन्या वर्तन्ते पुराणेषु तत्तत्कन्यानां नक्षत्रनामत्वात, किञ्च नक्षत्राधिपतिरपि सोम एव। स यदि रोहिण्या सह सङ्गतो भवति तदा लोकानां कृते शुभं भवति। यथोक्तं–

**दक्षिणेन यदा याति रोहिण्यां रोहिणीपतिः।**
**दूरस्थो निकटस्थो वा जगत्कष्टप्रदायकः।।**
**उत्तरस्यां यदा याति रोहिण्यां रोहिणीपतिः।**
**सोपसर्गात्तदा वृष्टिरस्पृशन् सुखिनो जनाः।।**
**रोहिणी शकटमध्यगः शशी शोकरोगमयदुःखदः स्मृतः।**
**शीतरश्मिमनुयाति रोहिणी कामिनो हि वशगांस्तदांगना।।**
**रोहिण्या पृष्ठतो याति यदा कुमुदिनीपतिः।**
**कामिनीनां वशं यान्ति नराः कामप्रपीडिताः।।**[6]

अतो लोकानां शुभाय रोहिणी–चन्द्रयोः सङ्गमो न भवेदिति दक्षशाप– कल्पना उचितैव। "चन्द्रस्य पक्षे पक्षे क्षयवृद्धी दृश्येते।" इति यक्ष्मरोग– शापोऽपि भङ्ग्या सिद्धमेव। किञ्च कुष्ठरोगशापविषयपक्षेऽपि इमं पुराणकथा वास्तविकी प्रतिभाति, तथा हि चन्द्रस्य वैवर्णत्वमेव तस्य कुष्ठरोगः, चन्द्रस्य वैवर्ण्ये सर्वा अपि लतातृणौषध्यः प्रभाविता भवन्ति तस्यौषधिपतित्वात्। लतातृणौषधीनां विकृतौ लोकानां महाननर्थसम्भावना वर्तते। तदुक्तं बृहत्संहितायां–

---

* ज्योतिष प्राध्यापक (संविदा), राष्ट्रिय संस्कृत संस्थान, मुम्बै परिसर

**भस्मनिभः परुषोऽरुणमूतिः शीतकरः किरणैः परिहीनः।**
**श्यावतनुः स्फुटितः स्फुरणो वा क्षुड्डमरामयचौरभयाय।।**[7]

चन्द्रविषये द्वितीयमुदाहरणं गुरुपत्नीनारापहरणं पुराणे वर्णितं वर्तते, तत्र तयोः संयोगे बुधस्योत्पत्तिरपि प्रदर्शिता।[8] इयं कथा वेदे ब्राह्ममणग्रन्थे च बहुषु स्थलेषु वर्णिता वर्तते। तस्य स्पष्टार्थस्तु इत्थं वर्तते–

अत्र बृहस्पतिः ग्रहवाची वर्तते। तथा च ताराशब्देनात्र पुष्यनक्षत्रं ग्राह्यम्। पुरा सर्वप्रथमं बृहस्पतेर्दर्शनं तारायाः (पुष्य) समीपे जातम्। यथा उक्तं वर्तते–

**बृहस्पतिः प्रथमञ्जायमानो तिष्यं नक्षत्रमभिसम्बभूव।।**[9]

तथा च मन्दगतित्वाच्चिरकालं यावत् सहैवाऽऽकाशे दर्शनेन तारा बृहस्पतेः पत्नीति निर्धारितम्। स्थितिरियं सम्भवा, यतो हि बृहस्पतेः परमशरः १,३० समो वर्तते। अतोऽस्य सामीप्येन युतिः पुष्य–मघा–विशाखा–अनुराधा–शतभिष–रेवती–नक्षत्रैस्सहैव भवितुं शक्यते। तेषु पुष्यनक्षत्रेण सह तस्य संयुतिरन्यन्त–सामीप्येन भवति। युतिकाले उभयोर्दर्शनमेक एव तारारूपेण भवति। स्थितावस्यां तस्याः पत्नीत्वरूपेण कल्पना समुचिता वर्तते। अनन्तरं यदा पुष्यनक्षत्रमतिक्रम्य बृहस्पतिः कञ्चिद्दूरं गतवांस्तदा द्रुतगामिचन्द्रस्तया सह युतिश्चकार। अयमेव चन्द्रतारयोः संगमः। ईदृशी स्थितिः सम्भवतो द्वादश्यां त्रयोदश्यां वा तिथौ जाता। पश्चाच्चन्द्रः पुश्यं परित्यज्याग्रे जगाम। अमान्ताऽऽसन्ने चन्द्रे प्रायशः बुधदर्शनं भवति। संयोगात्तदानीमेव चन्द्रतारयोः संगमकालानन्तरमेवाऽऽकाशे बुधदर्शनं जातम्। अत ईदृशी कथा कल्पिता यच्चन्द्रतारयोः योगेन बुधस्योत्पत्तिर्जाता।

एवं सर्वेषां कथानकानां मूले काचिद् वास्तविकी स्थितिरपि सन्निविष्टा वर्तते। अत एवात्र तेषां संकलनं कृतं वर्तते। हरिवंशपुराणे चन्द्रस्य कानिचिन् नामान्युल्लिखितानि सन्ति। यैस्तस्यगुणदोषस्वरूपाणि प्रकटी भवन्ति। तानि नामानि श्लोकद्वयेन तत्र दर्शितानि विद्यन्ते। यथा.

**श्वेतमानुर्हिमतनुर्ज्योतिषामधिपः शशी।**
**अब्दकृत् कालयोगात्मा इज्यो यरारसोऽव्ययः।।**
**ओषधीशः क्रियायोनिरम्भोनिधिरनुष्णभाक्।**
**शीतांशुरमृताधारश्चपलः श्वेतवाहनः।।**[10]

उक्तश्लोके चन्द्रः 'अब्दकृत् कालयोगात्मा' इति शब्दाभ्यां सम्बोधितः। चन्द्रः कथमब्दकृत इत्यस्य स्पष्टीकरणं ताण्ड्यब्राह्मणवस्याऽधोङ्किंतवचनाद् भवति।

**अग्निः संवत्सरः सूर्यः परिवत्सरः चन्द्रमा इदावत्सरः वायुः अनुवत्सरः।**[11]

अत्र संवत्सरेण सावनवर्षम्, परिवत्सरेण सौरवर्षम् इदावत्सरेण चान्द्रवर्षं तथा चानुवत्सरेण नाक्षत्रवर्षमिति बोध्यम्। इदमेवाधारीकृत्य सूर्यसिद्धान्ते इयं कल्पना कृता वर्तते।

**ब्राह्मं दिव्यं तथा पैत्र्यं प्राजापत्यं च गौरवम्**
**सौरं च सावनं चान्द्रमार्क्षमानानि वै नव।।**[12]

एवं चन्द्रः ओषधीशपदेनापि संबोधितः, यथोक्तं हरिवंशपुराणे.

**द्विजानां वीरुधां चैव नक्षत्रग्रहयोस्तथा।**
**यज्ञानां तपसां चैव सोमं राज्येऽभ्यसेचयत्।।**[13] **इति**

**ज्योतिषशास्त्रेचन्द्रविवेचनेम्–** नीलाम्बरनिलये दैदीप्यमानानां नक्षत्रादिप्रकाशपुञ्जानामधिपतिश्च स्वामृतरश्मिभिः भूपृष्ठान् सकलचराचरानमिसिञ्चयन् स्वानुपाकर्य सौन्दर्येन च सर्वानह्लादयति। वैदिककालादेव एतद्विषयक माख्यानं वैदिकवाङ्गमये संस्कृतवाङ्गमये लोके च बहुविधं प्रचलितमस्ति। अत्तायं सुधाकरः, सोमः, चन्द्रमा, चन्द्रः, कुमुदप्रियः रजनीपतिः शुभ्रभानुः, रोहिणीपतिः, कलानिधिः, उडुपतिः, शीतकरः, इत्यादि संज्ञया व्यवद्वतो वर्तन्ते। एतदतिरिक्तमपि चन्द्रस्य बहुनामान्तरं प्राप्यते। ऋग्वेदसंहितानुसारेण एककालावच्छेदेनैव सूर्यचन्द्रम–सोरुत्पत्तिः क्रमशः ब्रह्मणः नेत्ताभ्यां मनश्चाभवत्।[14] ऐतरेयब्राह्मवः "आदित्या द्वै चन्द्रमा जायते"[15] इत्युकत्वा सूर्यसकाशादेव चन्द्रोत्पत्तिः स्वीकरोति। कतिचनपुराणान्यपि **"ऋक्षचन्द्रग्रहाः सर्वेविज्ञोयासूर्य. सम्भवाः"**[16] शीतरश्मिः समुत्पन्नः कृत्तिकासु निशाकरः[17] इत्यादिना एतदेव' प्रमाणयन्ति। सिद्धान्तशिरोमणौ शृङ्गोन्नत्या–धिकारस्य ८.९ श्लोकयोरुपत्तौ भास्करेण "अत्र हरिहर विरञ्चिवरलाभश्रवण. सहर्षपुत्रकामात्रिनेत्र विगलित जलविन्दुरयमिन्दुः पिता महेन ग्रहत्वेना. काशेनिवेशित इति श्रुयते स्मृतिषु पुराणेषुश्च इति चन्द्रोत्पत्तिकारणं लिखितमस्ति। परन्तु आधुनिकं मतं भिन्नं वर्तते। आधुनिकैः पुराकाले चन्द्रः पृथिव्या एकमङ्गं स्वीकृतः।

**चन्द्रस्य ग्रहत्वम्–** भारतीय विद्वद्‌भिश्चन्द्रो ग्रहरुपेण स्वीकृतः। कारणं यदयं सिद्धान्तज्योतिषसमस्तेषु ग्रहेस्वेकतमः।[18] कारणादयं चन्द्रः भुवं परितः नियतगत्या स्वकक्षायां भ्रमनित। पुरा भारतीयैर्ग्रहाणां कक्षा भुवं परितः एव. स्वीकृता। अतः तैश्चन्द्रः भुवः उपग्रहत्वेन स्वीकृतः। चन्द्रः आकर्षणवशात् भुवं परितः भ्रमति न ह्यन्येषां ग्रहाणामिव रविं परितः, अतो भुवं परितः परिभ्रमणाद् पृथिव्या उपग्रहो वर्तते।

**कक्षानिरुपणम्–** आकाशस्थ चन्द्रः येन मार्गेण परिभ्रमति तत् मार्गमेव चन्द्रस्य कक्षा शब्देन ज्ञायते। इयं कक्षा चन्द्र विमण्डले ज्ञायते। उक्तञ्च "गोलपरिभाषायां" **"यत्रगच्छन्तिचन्द्राघास्तदृविमण्डलमुच्यते"**। वस्तुतस्तु भगोले चन्द्रवृतत्वं न सिद्धयति। अत्र एव प्राचीनैः[19] भूवृत्तानुरोधेनैव कक्षाकृतिं वृत्तरुपमङ्गीकृत्य ग्रहस्पष्टी कृता। नवीनानां मते चन्द्रकक्षा दीर्घवृत्ताकारा न तु वृत्ताकारा, पृथ्वी तस्य कक्षायाः एकस्मिन्नाभौ स्थिता वर्तते।

कक्षाक्रमः–

१– **मन्दामरेज्यभूपुत्रसूर्यशुक्रेन्दु जेन्दवः।**
**परिभ्रमन्त्यधोऽधस्था सिद्धाविधाधरा धनाः।।**

२– भूमेः पिण्डः शशाङ्कज्ञकविरविकुजेज्यार्किनक्षत्रकक्षा। वृतैर्वृतोवृतः सन् मृदनिलसल्लि तेजोमयोऽयम्।[20] अतः सर्वेषु ग्रहेषु चन्द्रस्य कक्षा भुवो निकटतमा वर्तते। एतस्यकारणमिदंयद् भारतीयगणकैः सर्वेषां ग्रहाणां योजनात्मिका गतिस्तुल्यैव स्वीक्रता।[21] अतएव अधिक गतित्वात् चन्द्रस्य कक्षा भूसमीपस्था कर्णमतिलध्वी च। चन्द्रस्य कक्षा विषये सूर्य सिद्धान्ते भूगोलाध्याये एवं प्रतिपादितमस्तियथा. खत्तयाब्धि द्विदहनाः कक्षा तु हिमदीधितेः। अतः चन्द्रस्य कक्षायोजन प्रभाणानि ३२४३० मितानि सन्ति।

**चन्द्रस्य योजनात्मककक्षाव्यासः–** ग्रहाणां योजनात्मिकागतितुल्यैव भवति; समागतिस्तुयोजनैः नभः सदां सदा भवेत्द्ध इति।

अतश्चन्द्रस्य योजनात्मिगतेर्ज्ञानं सुगमं यथा.

$$\frac{\text{खकक्षामित योजनानि}}{\text{कल्पकुदिनैः}} \times = \text{दिनगतियोजनानि।}$$ [22]

अस्यमानं सिद्धान्तशिरोमणौ ११८५८' ।४५'' परिमितं पठितम्। अनेन च चन्द्रस्य भगणपूर्ति संख्यया संगुण्ययोजनात्मिका चन्द्रकक्षायाः परिधिर्ज्ञायते। सा च ३२४००० मितानि योजनानि सन्ति।

- **Patel V., ArayaR., ChatterjeeS., ChisholmD., CohenA., De SilaM., HosmanC., McGuireH., Rojas G., van Ommeren M.** Treatment and prevention of mental disorders in low-income and middle-income countries, Lancet,2007, 370: 991-1005.
- **KapurM. (1997).**Mental Health in Indian Schools, Sage, New Delhi.




Scanned with OKEN Scanner

# शिक्षाशास्त्रविभागे अधीयानाः छात्राः




Scanned with OKEN Scanner

ISSN-2395-7921

# शिक्षारश्मिः

## शिक्षाशास्त्रविभागीयवार्षिकशोधपत्रिका

## 2016




शिक्षाशास्त्रविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
NAAC द्वारा A श्रेण्यां प्रमाणितः
(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)
क.जे.सोमैया-संस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई

Scanned with OKEN Scanner



प्रो.एम्. चन्द्रशेखरः, प्राचार्यः



प्रो.मदनमोहनझाः, विभागाध्य



डा.देवदत्तसरोदे



डा.वी.एस्.वी.भास्कररेड्डि



डा.आर्.जी.मुरलीकृ



डा.सो.ल.सीतारामशर्मा



डा. कुमारः



डा. सुनीलकुमारश

Scanned with OKEN Scanner

# शिक्षारश्मिः

## शिक्षाशास्त्रविभागीयवार्षिकशोधपत्रिका

## Departmental Annual Research Journal of Shiksha Shastra (Pedagogy)

## 2015-16

हस्तन्यस्तसमस्तशास्त्रविभव ! प्रादान्न किन्ते फलं,
सर्पिर्दीपकवर्त्तिकाश्च विविधा नोद्दीपिताः किन्ततः ।
शास्त्रग्रन्थिगुरुत्वगर्वदमनः श्लाघ्यश्च सेव्यः सतां -
शिक्षारश्मिरतः सरेदपसरेच्चान्तस्तलीयन्तमः ॥


**संरक्षकः**

**प्रो. एम्. चन्द्रशेखरः**

**प्रधानसम्पादकः**

**प्रो. मदनमोहनझाः**

**सम्पादकः**

**डा. देवदत्तसरोदे**

**सहसम्पादकाः**

**डा. सो. ल. सीतारामशर्मा** **डा. कुमारः** **डा. सुनीलकुमारशर्मा**



**शिक्षाशास्त्रविभागः**

**राष्ट्रियसंस्कृतसंस्थानम्**

**मानितविश्वविद्यालयः**

**(मानवसंसाधनविकासमन्त्रालयभारतसर्वकाराधीनम्)**

**क. जे. सोमैयासंस्कृतविद्यापीठम्,**

**विद्याविहारः, मुम्बई**

**महाराष्ट्रम् -४०० ०७७**



Scanned with OKEN Scanner

पत्रिकानाम — शिक्षारश्मिः (शिक्षाशास्त्रविभागीयवार्षिकपत्रिका)
प्रकाशकः — शिक्षाशास्त्रविभागः, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि.)
क. जे. सोमैयासंस्कृतविद्यापीठम्,
विद्याविहारः मुम्बई, महाराष्ट्रम् - ४०००७७ ।

© प्रकाशकाधीनम्

ISSN — 2395-7921

संरक्षकः — प्रो. एम्. चन्द्रशेखरः
प्राचार्यः
प्रधानसम्पादकः — प्रो. मदनमोहनझाः
विभागाध्यक्षः, शिक्षाशास्त्रम्

सम्पादकः — डा. देवदत्तसरोदे
सहसम्पादकाः — डा. सोमाशिलक्ष्मीसीतारामशर्मा
डा. कुमारः
डा. सुनीलकुमारशर्मा

सम्पादकमण्डलम् — १. डा. वी. एस्. वी. भास्कररेड्डि
२. डा. आर्. जी. मुरलीकृष्णः
३. श्रीज्योतिरञ्जननन्द
४. श्रीसाईप्रसाद आप्टे
५. सुश्रीअनुसूया महान्ता
६. सुश्रीप्रियाङ्कामहापात्र

मुद्रणसहयोगः — लक्ष्मीकान्तदासः, देबाशिषपण्डा च

प्रकाशनवर्षम् — 2015-16 (तृतीयाङ्कः)
प्रतिकृतयः — 200
मुद्रकः — वन्दना आर्टस्, मुम्बई-77

# Shree Somnath Sanskrit University


(Estd. By Government of Gujarat)

Rajendra Bhuvan Road, VERAVAL - 362266
District : Gir Somnath, Gujarat, INDIA
Phone : 02876 - 244531 Fax : 02876 - 244417

**Prof. Ark Nath Chaudhary**
Vice Chancellor


Ref : SSSU/VC/234/2016

Date : 02-03-2016



## ॥ शुभाशंसनम् ॥

सम्पूर्णे भारते एकादशभिः परिसरैः समन्वितस्य संस्कृतविद्यासंवर्धनतत्परस्य राष्ट्रिसंस्कृतसंस्थानस्य मुम्बईनगरे क. जे. सोमैयापरिसरः विद्याविहारोपनगरस्थः विद्यावतां विहाराय महत्त्वपूर्णः, यत्र अर्वाच्यविद्याविद्भिः साकं प्राच्यविद्याप्रसारकर्मणि निरन्तरं संलग्नोऽयं परिसरः शास्त्राध्यापनेन सह अध्यापकशिक्षायै प्रशिक्षणपाठ्यक्रमं शिक्षाशास्त्रीति नामधेयं कुशलतया सञ्चालयति।

शिक्षाशास्त्रविभागे कुशलानां विषयदक्षाणां आचार्योपाचार्यसहायकाचार्याणां नेतृत्वे अध्यापनकौशलेन सहैव लेखनकौशलमपि छात्राणां संवर्ध्यमानं वर्षेभ्योऽवलोकितं मया।

अस्मिन्नेव क्रमे प्रो. मदनमोहनझामहोदयस्य आध्यक्ष्ये डा.देवदत्तसरोदेमहोदयस्य सम्पादकत्वे शिक्षाशास्त्रसम्बद्धाः महत्त्वपूर्णाः लेखाः विशिष्टानां विदुषामपि सङ्कलीक्रियन्ते प्रतिवर्षम्।

एतान् महत्त्वपूर्णान् शिक्षाशास्त्रसम्बद्धान् उपयोगिनः लेखान् प्रकाशयितुं शिक्षाशास्त्रविभागः **शिक्षारश्मिः** इत्यभिधेयां वार्षिकीं शोधपत्रिकां प्रकाशयति इति वेदं वेदं भृशं प्रसीदामि। सर्वेभ्यो मान्यलेखकेभ्यो विभागाध्यक्षसहितसम्पादकप्राध्यापकेभ्यः मदीयां हार्दीं शुभकामनां प्रकटयामि।

भावत्कः शुभाकाङ्क्षी

(प्रो. अर्कनाथचौधरी)
कुलपतिः

Scanned with OKEN Scanner

प्रो. एम्. चन्द्रशेखरः, प्राचार्यः
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
क. जे. सोमैयासंस्कृतविद्यापीठम्,
विद्याविहारः, मुम्बई-४०००७७

Prof. M. Chandrashekhar
Principal
Rashtriya Sanskrit Sansthan
(Deemed University)
K.J.Somaiya Sanskrit Vidyapeetham
Vidyavihar, Mumbai -400077

मोबाईल क्र. 9769584349, दूरभाष क्र. (का) - 022-21025452/82, ई-मेल - rsksmumbai@yahoo.com



## ॥ शुभाशंसनम् ॥

शिक्षा विकासे मनुजस्य पूर्णः प्रकाश एवानुभवो विशिष्टः ।
सामाजिकं या विदधाति रूपं नरस्य यज्जीवनमेव शिक्षा ॥

ननु शिक्षा हि जीवनम् । शिक्षामन्तरा जीवनसद्भाव एव ऊहितुमप्यशक्यः । इयं हि शिक्षा मानवं पशुभ्यः पृथक्कृत्य तं लोकोत्तरं विधातुं समर्था । यथा यथा शिक्षायाः महत्त्वं जनैः ज्ञातं, तथा तथा शिक्षाशास्त्रस्यापि अध्ययनम् अध्यापनञ्च सर्वेषु देशेषु व्यापृतम् । शिक्षया सम्बद्धानि अनेकानि शास्त्राणि अस्याङ्गत्वमवाप्नुवन्, यथा - दर्शनं, मनोविज्ञानं, सम्प्रेषणप्रविधिः, समाजविज्ञानं, शिक्षणविधयः, अनुसन्धानमित्यादीनि । वैज्ञानिकचिन्तनस्य आधारेण शिक्षाक्षेत्रे नवीनानामुपकरणानां, नियमानां, साधनानाञ्च आविष्कारेण साधिता प्रगतिः प्रशंसनीया एव ।

छात्रकेन्द्रितशिक्षायाः सर्वोत्तमप्रचारेण शिक्षकाणामुत्तरदायित्वं प्रतिदिनं प्रवर्धमानमस्ति । अतः संस्कृतशिक्षकाः नूनमेव विषयाणां बोधनाय शिक्षणविज्ञानेन परिचिताः भवेयुः । अत एव शिक्षकप्रशिक्षणसंस्थानामुत्तरदायित्वं महत्तमं वरीवर्ति । तत्र राष्ट्रियसंस्कृतसंस्थानस्य नैकेषु परिसरेषु शिक्षाशास्त्रविभागः संस्कृतशिक्षकप्रशिक्षणकार्ये संलग्नोऽस्ति ।

तेष्वन्यतमः मुम्बईपरिसरः मुम्बापुर्यां राराज्यते । तत्राध्ययनाध्यापनसुखसौविध्यभरितेनातिप्रवृद्धेन शिक्षाविभागेन शिक्षकाणां हृदयसङ्गमनी शिक्षारश्मिः इति नाम्नी वार्षिकशोधपत्रिका तृतीयाङ्कभूता प्राकाश्यं नीयत इति नो मोदाय ।

विभागाध्यक्षेण सह सर्वेऽपि सदस्याः, तेषामन्तेवासिनश्च भृशमभिनन्दनार्हाः । शोधपत्रिकाया अस्याः सफलप्रकाशनाय कारणीभूतेभ्यः सर्वेभ्यः साधुवादाः ।

शिक्षारश्मयः दोधूयन्ताम् इत्याशासे ।

॥ शुभं भूयात् ॥

(प्रो. एम्. चन्द्रशेखरः)
प्राचार्यः

Scanned with OKEN Scanner

# विषयानुक्रमणिका


| क्र.सं. | शीर्षकम् | लेखकः | पुटसंख्या |
|---|---|---|---|
| 1. | RESEARCH DESIGN (A Thought Content) | - Prof. M. Chandrashekhar | 01-03 |
| 2. | अवधानविस्तारः, तस्य मापनविधिः | - प्रो.मदनमोहनझा | 04-13 |
| 3. | अध्यापकेषु भाषाकौशलोन्नयनोपायाः | - डा.देवदत्तसरोदे | 14-19 |
| 4. | भूमण्डलीकरणं शिक्षा च | - डा.वी.एस्.वी.भास्कररेड्डी | 20-25 |
| 5. | विराडसि विष्णुरिवेह सरस्वती | - डा.आर्. जी. मुरली कृष्णः | 26-28 |
| 6. | योगशास्त्रानुसारं स्मृतिविचारः | - डा.सो.ल.सीतारामशर्मा | 29-31 |
| 7. | Importance of English Teaching in Traditional Teacher Training Colleges | - डा.कुमारः | 32-35 |
| 8. | Mental health in India and Services | - Shri. Shankar Baburao Aandhale | 36-41 |
| 9. | शिक्षा तकनीकी और संस्कृत अध्यापक की भूमिका | - डा.सुनीलकुमारशर्मा | 42-46 |
| 10. | समायोजन एवं रक्षाप्रतितन्त्र | - डा.आरतीशर्मा | 47-51 |
| 11. | छात्राणां भाषाकौशलोन्नयनोपायाः | - डा.बिचित्ररञ्जनपण्डा | 52-56 |
| 12 | संकृते पठनकौशलम् | - डा. इ. वेङ्कटेश्वर्लु | 57-62 |
| 13. | सामाजिकविज्ञानशिक्षणस्य शिक्षणप्रतिमानानि | - डा. प्रेमसिंहसिकरवारः | 63-66 |
| 14. | संस्कृताधिगमे कतिचनाधुनिकविधिप्रविधीनां प्रयोगः | - डा. बि.वेङ्कट लक्ष्मी नारायणः | 67-70 |
| 15. | संस्कृतशिक्षणस्य आधारः, दार्शनिकचिन्तनम् ; एका दृष्टिः | - डा. सुशान्तहोता | 71-75 |
| 16. | संस्कृतशिक्षकाय सशिक्षणाधिगमप्रक्रिया | - डा.सगरिकानन्द | 76-79 |
| 17 | Development of Personality and Health of Teachers Through Yoga | - DASARI RAGHURAM | 80-82 |
| 18. | दर्शनदृशा अध्यापकेषु व्यक्तित्वविकासोन्नयनम् | - प्रगतिदीक्षित | 83-87 |
| 19. | पञ्चतन्त्रे प्रतिपादितानि अध्यापकेषु सामाजिकतायाः विकासात्मकतत्त्वानि | - जी. उमानरसिंहमूर्तिः | 88-92 |
| 20. | समस्यासमाधानक्षमतोन्नयने मार्गदर्शनपरामर्शयोः व्यूहानाम् आवश्यकता | - आलपाटि.पवनकुमारः | 93-98 |
| 21. | अध्यापकेषु मानवमूल्याभिवर्धनम् | - गोविन्द सरकारः | 99-102 |
| 22. | अध्यापकानां व्यक्तित्वविकासः | - हेमन्तदत्तः | 103-105 |
| 23. | अभिव्यक्तिकौशलविकासे नवीनप्रवृत्तयः | - अमृता कौर | 106-108 |
| 24. | अध्यापकेषु मानवमूल्याभिवर्धनम् | - स्मिषा वी.डी | 109-113 |
| 25. | अध्यापकेषु व्यक्तित्वविकासः | - मृत्युञ्जयचक्रवर्ती | 114-118 |
| 26. | अध्यापकेषु मानवमूल्याभिवर्धनम् | - योगेन्द्रकुमारः | 119-122 |


Scanned with OKEN Scanner

| | | | |
|---|---|---|---|
| 27. | आदर्शवादपरिप्रेक्ष्ये अध्यापकेषु मानवमूल्याभिवर्धनम् | - शिवेन माजी | 123-126 |
| 28. | अध्यापकों में शिक्षणकौशलोन्नयन | - जितेन्द्रकुमार गुप्ता | 127-129 |
| 29. | छात्राध्यापकों में शैक्षिक कौशलोन्नयन | - रामजियावन | 130-139 |
| 30. | भवभूतिकृतिषु शैक्षिकतत्त्वानि | - एल्.वी. सुब्बाराव: | 140-142 |
| 31. | अध्यापकानां व्यावसायिकशैक्षिकक्षमतोन्नयने विविधसर्वकारीयसङ्गठनानि | - डा. राकेशकुमारजैन: | 143-147 |

परियोजना:

| | | | |
|---|---|---|---|
| 1. | शिक्षाशास्त्रविभागीयभाषाबोधनवर्गस्य प्रतिवेदनम् | - पाणिनिवर्ग: | 148-149 |
| 2. | केन्द्रीयमाध्यमिकशिक्षापरिषद: अष्टमकक्षाया: पाठ्यपुस्तकसमीक्षा | - कात्यायनवर्ग: | 150-152 |
| 3. | महाराष्ट्रराज्यमाध्यमिकशिक्षाया: संस्कृतपाठ्यपुस्तकसमीक्षणम् | - पतञ्जलिवर्ग: | 153-155 |
| 4. | नवशिक्षानीते:समीक्षणम् | - भर्तृहरिवर्ग: | 156-161 |
| 5. | परिसरे आयोजिता: विविधा: कार्यक्रमा: | - मम्मटवर्ग: | 162-164 |
| 6. | संस्कृतशिक्षणे सूचनाप्रद्योगिकी | - चरकवर्ग: | 165-167 |
| 7. | संस्कृतशिक्षणे WIKI PEDIA इत्यस्य उपयोगिता | - कणादवर्ग: | 168-170 |

| | | |
|---|---|---|
| 1. | परोशिष्टम्—शिक्षाशास्त्रछात्राध्यापकसूची (गृहसङ्केतसम्पर्क) | 1-4 |


Scanned with OKEN Scanner

# भूमण्डलीकरणं शिक्षा च

## (Globalization and Education)

*Dr V S V Bhaskar Reddy*
**Asst. Professor in Education**

|विज्ञानस्य अनुसन्धानेन नूतनाविष्कारैश्च जगदिदं निरन्तरं परिवर्तमानं विलोक्यते, एवं गते शिक्षाक्षेत्रं कथमस्पृष्टं स्थास्यति ? अपि च साम्प्रतं प्रथितमिदं जगत् सञ्चारसाधनैः नीडमिव संवृत्तम्, प्रकृतनिबन्धे लेखकः भूमण्डलीकरणं नाम किम् ? तेन शिक्षा कथं प्रभाविता ? इति सविस्तरम् अभिवर्ण्य अस्य गुणदोषान् तार्किकशैल्या न्यरूपयत् । परिवर्तमाने जगति परिवर्त्यमानायां शिक्षायां च आत्मानं समायोज्य भूमण्डलीकरणस्य दोषाः समस्याः वा अस्माभिः सम्मुखीकर्त्तव्याः ।|

भूमण्डलीकरणस्य प्रभावः शिक्षाक्षेत्रे कथं भवतीति अवबोधाय तेन सह सम्बद्धाः केचन सम्प्रत्ययाः सामान्यतया ज्ञातव्याः भवन्ति । ते च यथा – 1. सरलीकरणम् / उदारीकरणम् (Liberalization), 2. निजीकरणम् (Privatization), 3. भूमण्डलीकरणम् (Globalization). अस्यैव सम्प्रत्ययस्य वाणिज्यक्षेत्रे शिक्षाक्षेत्रे च **LPG** इति नाम्ना संक्षिप्ततया व्यवह्रियते ।

**सरलीकरणम् / उदारीकरणम् (Liberalization) L of LPG**

सरलीकरणं नाम राज्यसम्बद्धानां सामाजिक-आर्थिक-वाणिज्य-शिक्षादि क्षेत्रेषु सर्वकारेण प्राक्तन-समये निर्धारितेषु नीति-अधिनियम-अधिसूचना-नियम-निबन्धानादिषु शैथिल्यसम्पादनं भवति । सर्वकारीय नियमानां निबन्धानाम् अनुज्ञप्त्यादीनाञ्च (Licenses) विषये काठिन्यतां दूरीकृत्य उत्पादन-वाणिज्य-शिक्षादि क्षेत्राणां क्रियाकालापेषु निजक्षेत्रस्य सर्वकारीयक्षेत्रेण सह समस्तर-प्रकल्पनम् अर्थव्यवस्थायाम् अर्थशास्त्रे च सरलीकरणित्यभिधीयते । 1991 तम वर्षादारभ्य भारते आर्थिकसंस्करणनाम्ना आरब्धं राजनैतिक-आर्थिक-वाणिज्य-सेवादि क्षेत्रेषु जातं परिणामक्रममेव सरलीकरणमित्यभिधीयते । सरलीकरणस्य मूलं (धातुः) GATT भवति । अस्यानुसारं 160 सेवाः विश्वव्याप्ततया प्रसाराय प्रावधानावसराः प्रकल्पिताः । आर्थिक-वाणिज्य-व्यापार-आयात-निर्यात-शिक्षादि क्षेत्रेषु सर्वकारीय हस्तक्षेपस्य निष्कासनं, निजक्षेत्रस्य च प्रोत्साहश्च सरलीकरणेन एव जायते ।

**निजीकरणम् (Privatization) P of LPG**

लोकसेवा-सर्वकारीयोपक्रम-वाणिज्य-वित्तकोशव्यवस्था-आयात-निर्यात-उत्पादन-निर्माण-परिवहन-निर्माण- वस्तु-सेवादि क्षेत्रेषु एतावता सर्वकारस्य हस्ते दृश्यमानस्य स्वामित्वस्य निजक्षेत्रेषु स्थानान्तरणाय अनुज्ञप्तिप्रदानमेव (Licenses) निजीकरणमित्यभिधीयते । निजीकरणेन विविधक्षेत्रेषु सर्वकारस्य स्वामित्वं नाममात्रतया आंशिकतया वा विलसति । निजक्षेत्राणां वर्चत्वं विराजते । निजीकरणाय सरलीकरणं सोपानं भवति । Barbar Lee & John Nelli महोदयाभ्यां मतानुसारं सर्वकारस्याधीने विद्यमानक्षेत्रेषु अधिकारः / स्वामित्वम्/आधिपत्यं वा निज-व्यक्तिभ्यो (Private persons) निज-निकायेभ्यो (Private companies) वा प्रदानं समर्पणं वा निजीकरणं भवति । निजीकरणेन आर्थिक-वाणिज्य-आयात-निर्यात-शैक्षिकादि क्षेत्रेषु



Scanned with OKEN Scanner

सर्वकारस्य क्षस्तक्षेपः नैव दृश्यते। निजीकरणेन शिक्षायाः प्रसारः गुणवत्तात्मकतया क्रियते। परन्तु निजीकरणेन विद्यार्जनं न भवति, विद्यायाः क्रयणमेव भवति । अर्थात् सम्पन्नानामेव गुणवत्तमयाः शैक्षिकावसराः समुपलभ्यन्ते, न तु निर्धनिनाम्।

भूमण्डलीकरणम् (Globalization) G of LPG

भूमण्डलीकरणं नाम एका प्रक्रिया भवति, यत्र क्षेत्रीय आर्थिक-सामाजिक-सांस्कृतिक-शिक्षणादयः भूव्याप्तविनिमयजालेन एकतां प्राप्नुवन्ति। भूमण्डलीकरणं नाम वाणिज्येन विदेशीप्रत्यक्षनिवेशेन द्रव्यप्रवाहेन जनप्रव्रजनेन प्रविधेः प्रसारेण च राष्ट्रीय-अर्थव्यवस्था अन्ताराष्ट्रिय-अर्थव्यवस्थारुपेण परिवर्तनं भवति । अन्ताराष्ट्रियद्रव्यनिधेरनुसारं (IMF) भूमण्डलीकरणं नाम विवधदेशानां मध्ये प्रतिदिनं वर्धमाना परस्पराधारिता आर्थिकस्थितिः, विविधदेशानां सीमाम् अतिक्रम्य सरलतया जायमाना विवधप्रकारकैः वस्तुभिः सेवाभिश्च प्रक्रिया भवति । अनेन मानवसंसाधनानां प्रयासाः विचाराः ज्ञानं, सूचनादयः राष्ट्रियसीमाम् अतिक्रम्य स्वेच्छारुपेण प्रवहिताः भवन्ति । विविधदेशानां मध्ये सूचना-सम्प्रेषण-प्रविधि-वस्तु-सेवादीनामाधारेण पारस्परिक-क्रियाकलापाय अवसराः समुपलभ्यन्ते । परस्पर-सहयोगभावेन परस्परविकाससम्पादनं सरलतमं जायते। भूमण्डलीकरणेन बृहत् प्रपञ्चमिदं कुग्रामत्वेन परिवर्तनं प्राप्नोति। भूमण्डलीकरणेन विविधदेशेषु उपविश्य छात्राः शिक्षकाश्च आभासीकरणस्य ई-अधिगस्य चाधारेण अध्यापनाय अध्ययनाय च अवसराः समुपलभ्यन्ते । भूमण्डलीकरणेन विविधदेशेषु उपलभ्यमानानां शैक्षिक-स्रोतासाम् उपयोगः अस्माकं गृहे उपविश्यैव कर्तुं शक्यते।

**भूमण्डलीकरणस्य लक्षणानि विशेषताः वा –**

1. भूमण्डलीकरणम् एका विश्वव्यापीभावना सम्प्रत्ययो वा भवति।
2. सम्प्रत्ययोयं सामाजिक-आर्थिक-सांसकृतिकादि क्षेत्रैस्सारं शिक्षाक्षेत्रमपि प्रभावयति।
3. अनेन परस्परसन्धानं सम्पर्कश्च अत्यन्त-महत्वपूर्णं भवति। येन सीमाऽतीता एकता सिद्ध्यति।
4. अनेन ज्ञान-विज्ञान-प्रविधि . . . इत्यादयः सूचनाक्षेत्रे क्रान्तिकारिपरवर्तनानि आनयन्ति।
5. अनेन सर्वेषु क्षेत्रेषु निवेश-प्रवाहः प्रपञ्चव्याप्ततया वर्धते।
6. अनेन वस्तूनां सेवानाञ्च वाणिज्येन साकं मानवसेवानाञ्च वाणिज्यं वर्धते।
7. अनेन अन्ताराष्ट्रियसंस्थाः विविधदेशेभ्य ऋणप्रदानं प्रदातुं शक्यते।
8. अनेन जनाः एकस्मात् देशात् अपरदेशं प्रति प्रव्रजिताः भवन्ति। अनेन प्रतिभापलायनं बुद्धेः उपनिवेशश्च जायते।
9. अनेन विविधदेशानां मध्ये वाणिज्य-आर्थिक-प्राविधिक-शिक्षादि क्षेत्रेषु परस्परसहयोगः जायते।

शिक्षायां भूमण्डलीकरणस्य प्रभावः – शिक्षाक्षेत्रे भूमण्डलीकरणस्य प्रभावः बहुषु आयामेषु दृश्यते। तेषां विवरणम् अधः प्रस्तूयते यथा –



Scanned with OKEN Scanner

**1. ज्ञानक्रान्तिः पाठ्यचर्या च –**

भूमण्डलीकरणेन प्रत्येकं क्षेत्रे ज्ञातव्याः विषयाः प्रतिदिनं वर्धन्ते । एवमेव शिक्षाक्षेत्रेऽपि नूतनतमाः आविष्काराः जायन्ते । साम्प्रतिक-विषयवस्तुषु सर्वदा परिवर्तनानि समायान्ति । अतः पाठ्यचर्या सर्वदा नवीनतमैः विषयवस्तुभिः परिवर्त्य नूतनत्वं प्राप्नोति । स्थानीय-क्षेत्रीय-राष्ट्रियभाषाणाम् अपचयः, विदेशीभाषाणाम् उपचयः जायते । मानवीयशास्त्राणां प्राधान्ये ह्रासो जायते । विज्ञान-प्राविधिक-सूचनाप्रविध्यादि शास्त्राणाम् अद्वितीय-प्राधान्यं प्रयच्छन्ति । वाणिज्य-चिकित्सा-जीवप्राविधिक-जीवाण्वादीनां शास्त्राणाञ्च अद्वितीय-प्राधान्यं प्रयच्छन्ति ।

**2. संगणकयन्त्रानुप्रयोगस्य वर्धनम्**

संगणकक्षेत्रे प्रतिदिनं जायमानेन प्राविधकक्रान्त्या शिक्षाक्षेत्रे शीघ्रतम-परिवर्तनानि समायान्ति । तेषां फलं वयम् अनुभवामः । यथा- 1 . Multi media 2. Computer simulation 3. Digital library 4. e-books & e-journals 5. Computer network 6. Satellite television 7. E-mail & Internet 8. Video/Electronic conference, 9. Virtual learning 10. Social networks.

**3. दूरस्थशिक्षायाः व्यावसायिकाध्ययनक्रमस्य च प्राधान्यवर्धनम्**

परम्परागतशिक्षाव्यवस्था-दूरस्थशिक्षाव्यवस्थयोः अनुपातो महत् परिवर्तनमानयति । मुक्तविद्यालयानां मुक्तविश्वविद्यालयानां स्थापनं, साधारणविश्वविद्यालयेषु दूरस्थशिक्षाविभागानाञ्च आरम्भः क्रियते । इदानीं तु अध्ययनसामग्र्यादयः One way audio, One way video उपलभ्यन्ते, भविष्ये तु Two way audio, two way video material उपलभ्यन्ते, सम्पर्कवर्गाः आभासीयवर्गाश्च आयोज्यन्ते । शैक्षिककार्यक्रमाणाम् आयोजनाय दूरदर्शनानां शैक्षिकोपग्रहाणाञ्च प्रयोगाः क्रियन्ते । जीवनगतेः प्राधान्यं प्रदीयते न तु राजनैतिकविषयाणाम् ।

**4. अन्ताराष्ट्रियसंस्थाभ्यो वित्तानुदानप्राप्तिः**

प्राथमिकशिक्षायाः वैश्वीकरणार्थं England सर्वकारस्य, UNESCO, UNICEF, World bank इत्यादीनां वित्तानुदानेन DPAP , सर्वशिक्षा अभियान योजनायाश्च क्रियान्वयनं सरलतया कुर्तुं शक्यते ।

**5. शिक्षकस्य स्थाने परिवर्तनम्**

गुरुमुखतः शिक्षा इति, अधिगमाय गुरुरेव स्रोत इति सम्प्रत्ययश्च नश्यति । यतः भूमण्डलीकरणेन अधिगमाय बहूनि संसाधनानि उपलभ्यन्ते । स्वीय रुचेः आवश्याकतायाश्च अनुसारं स्वाध्ययनाय समुचिताः अवसराः समुपलभ्यन्ते । गुरु-शिष्यसम्बन्धाः प्राविधिक-सम्बन्धत्वेन परिणमन्ति ।

**6. नूतनाध्ययनक्रमस्य आरम्भः**

विविधपाठ्यक्रमाणां सङ्करेण नूतन-पाठ्यक्रमाणां जन्म जायते अर्थात् अन्तःशास्त्रीयाध्ययनक्रमस्य विकासो जायते । यथा – *Economics, Mathematics, Statistics* इत्यादि विषयाणां सङ्करेण Econometrics इति नूतमपाठ्यक्रमस्य, *Geography Politics* इत्ययोः विषययोः सङ्करेण Geo-politics इति नूतमपाठ्यक्रमस्य, *Biology Technology* इत्ययोः विषययोः सङ्करेण *Bio-technology* इति

नूतमपाठ्यक्रमस्य, *MicroScience Biology* इत्ययोः विषययोः सङ्करेण *Micro-biology* इति नूतमपाठ्यक्रमस्य, *Psychology Physics* इत्ययोः विषययोः सङ्करेण *Psycho-metry/Psycho Physics* इति नूतमपाठ्यक्रमस्य, Bio-techonology, Micro-biology इत्ययोः विषययोः सङ्करेण Bio-chemistry इति नूतमपाठ्यक्रमस्य च जन्म उद्गमो वा जायते। अनेन जनानां जीवने गुणवत्तायाः कारणं भजते।

### 7. शिक्षाप्रशासने परिवर्तनम्

संगणकयन्त्रस्य अन्तर्जालस्य सूचनाप्रविधेश्च क्रान्त्या दैनन्दिन-शिक्षाप्रशासनिकव्यवहारेषु सौविध्यप्रकल्पनम्। अन्तर्जालीयसौविध्येन शिक्षाप्राशासनिकव्यवहारेषु अध्ययनक्रम-प्रवेश-परीक्षापरिणाम-छात्रवृत्ति-आवासीयसौविध्यादीनां सूचनाः अवबोधे सर्वेषां भौगोलिकातीतसौविध्यं जनयति। शिक्षासंस्थानां प्राशासनिकस्वामित्वाधिकारः निजव्यक्तिभ्यो निजसंस्थाभ्यो वा प्रदीयते।

### 8. विदेशी-शिक्षासंस्थानां स्थापनम्

भारते प्राथमिक-माध्यमिक-उच्चशिक्षायाश्च प्रसाराय विविधदेशेभ्यो अवस्थापितानां विदेशी-शिक्षासंस्थानां संस्थापनम्। भारते विदेशी-विश्वविद्यालयाश्च संस्थाप्यन्ते। अनेन शिक्षाक्षेत्रे प्रतियोगिताभावः वर्धते, प्रतियोगितया शिक्षायाः स्तरे गुणवत्तायाः विकासो जायते।

### 9. सांस्कृतिकविकासः

भूमण्डलीकरणेन अन्येषाम् इतिहासः, संस्कृतयः जीवनरीतयः भाषाश्च ज्ञातुमर्हन्ति। येन शान्तुयुतस्य सहजीवनस्य बन्धुतायाश्च विकासो जायते। फलतः जनानां मध्ये एकताभावस्य अन्ताराष्ट्रियावबोधस्य वसुधैव कुटुम्बकभावस्य च विकासो जायते।

### 10. प्रतियोगिता-भावस्य विकासः

जीवने अस्तित्वाय अधिगमाय च संघर्षः अनिवार्यः भवति। स्पर्धया वर्धते इति आभाणकस्य विकासः जायते। अन्यैस्सह निरन्तरं स्पर्धाशीलाः भवितव्याः, अस्या अभावेन अप्रगतिशीलाः भवितुमर्हन्तीति मत्वा विकासाय प्रयासाः।

### शिक्षायाः भूमण्डलीकरणस्य गुणाः / उपयोगाः

1. भूमौ निवसमानानां समस्तमानवानां व्यवहाराः एकान्ताराष्ट्रियग्रामत्वेन परिणमयन्ति।
2. विकासमानेन प्रविधिना शिक्षासंस्थानानि सर्वेभ्य उपलभ्यन्ते। अर्थात् सर्वेषां वैविध्ययुतानां शैक्षिकावसराणां प्रकल्पनं कर्तुं शक्यते।
3. प्रतिभायाः अत्युत्तमम् आदरणं समुपलभ्यते। अर्थात् अन्तर्निहित-शक्तीनां बहिरानयनाय समुचितावसराः समुपलभ्यन्ते।
4. गृहे उपविश्यैव विविधराष्ट्रिय-सीमानाम् अतिक्रम्य ज्ञानस्य विज्ञानस्य च प्राप्तये अवसराः समुपलभ्यन्ते।
5. छात्राणां मध्ये प्रतियोगितायाः कारणेन गुणात्मकशिक्षायाः विकासो जायते।



Scanned with OKEN Scanner

6. छात्राणां विविधसांस्कृतेभ्यः परिचयेन बन्धुतायाः वसुधैव कुटुम्बकस्य च भावनायाः विकासो जायते।
7. अल्पमूल्यैव अनायासेनैव विविधसंसाधनानि उपलभ्यन्ते।
8. ज्ञानस्य विज्ञानस्य कौशलादीनाञ्च अर्जने समयस्य शक्तेः प्रयासस्य च सदुपयोगः जायते।
9. विवधप्रकारकाणाम् अन्ताराष्ट्रियसंस्थाभ्यः सहायतानुदानं वित्तानुदानं वा प्राप्तुं शक्यते।

**शिक्षायाः भूमण्डलीकरणस्य दोषाः / दुरुपयोगाः**

1. शिक्षायाः भूमण्डलीकरणेन केवलं सम्पन्नानां छात्राणामेव लाभः जायते। परन्तु निर्धनिनां छात्राणां हितकारकं नैव भवति। निर्धनिनां छात्राणाम् इदं केवलं आम्लं द्राक्षफलंवत् भवति।
2. एतवता भारते शिक्षानीतीनां निर्धारणे परिवर्तने संशोधने च केवलं भारतसर्वकारस्य सर्वोच्चन्यायालयस्य च हस्ते अधिकाराः सार्वभौमः शक्तिर्वा आसन्। परन्तु भूमण्डलीकरणेन ते अधिकाराः शक्तयश्च विश्ववित्तकोशस्य (World bank) विपणकशक्तीनां (Market forces) हस्ते स्थानान्तरिताः भवन्ति।
3. शिक्षायाः वाणिज्यीकरणं (Commercialisation) जायते। अर्थात् शिक्षा नाम ज्ञानस्वरुपिणी नैव भवति, केवलं विपणे क्रयण-योग्या काचित् वस्तुविशेषा जायते। स्वतन्त्रभारताय इदं हानिकारकं भवति।
4. शिक्षायाः भूमण्डलीकरणेन सुसंस्कृति-शोभमाने भारते विदेशीयानां विष-संस्कृतेः प्रभावः जायते।
5. अनेन भूमण्डलीकरणेन छात्राणां मध्ये अस्वास्थ्य-प्रतियोगितायाः कुविकासो जायते।
6. बौद्धिकसम्पत्तेः अधिकारनाम्ना (Intellectual property rights) ज्ञानं विज्ञानं वा केषाञ्चन व्यक्तीनां निजनिकायानां निजसंस्थानां वा हस्तगतं भवति। ज्ञानं शिक्षा च केषाञ्चन जनानां वैय्यक्तिकसम्पत्तिः जायते।
7. अनेन व्यक्तीनां देशानाञ्च मध्ये Digital divide इति नूतनताया असमानतायाः कुविकासो जायते।
8. अनेन प्रतिभापालयनं (Brain drain) जायते, दास्यप्रवृत्तेश्च (Slavery) कुविकासो जायते।
9. आर्थिक-मान्द्येन (Recession) शिक्षाव्यवस्था कुप्रभाविता भवति।
10. अनेन मानवीय-सम्बन्धेषु ह्रासो, पारिवारिक-सामाजिक-सांस्कृतिकादि मूल्येषु विषमपरिवर्तनानि जायते।
11. शिक्षा विपणिकवस्तूरूपेण परिवर्तयति।
12. एतावता निर्धनिनां छात्राणां शिक्षाप्रसाराय जायमानस्य एककव्ययस्य (Unit cost) पूर्तिः उपदानसम्प्रत्ययेन (Subsidy) अनुभरणं क्रियते स्म। परन्तु भूमण्डलीकरणेन सम्प्रत्ययोऽयं लुप्तो भवति।

अनुशीलिता:

1. Ganta Ramesh; Foundations of Education, Neelkamal Publications, Hyderabad.

2.A.S.Ramesh; Foundations of Education, New Era Publications, Guntur.

3. తెలుగు అకాడమి; విద్య తాత్వికాధారాలు, హైదరాబాదు. (तेलुगु अकादमी; विद्या तात्विकाधारालु . हैदराबादु)

4. M.V.Ramana Reddy; Impact of Globalization on India, Kavitha Publications, Prod-dutur

5. R. Nageswara Reddy: Communication Systems & ICT, Proddutoor, Cuddapah.

6. Sangay Jamtsho: Globalization - Challenges of Socialism, New Delhi.

7. A. Murali Rao: 'Digital Library Security: A Layered Approach', New Delhi.

*Dr V S V Bhaskar Reddy*

**Asst. Professor in Education**

**Rashtriya Sanskrit Sansthan(DU)**

**K.J.Somaiya Sanskrit Vidyapeetha,**

**Mumbai**

शिक्षाशास्त्रविभागे अधीयानाः छात्राः




Scanned with OKEN Scanner

ISSN-2395-7921

# शिक्षारश्मिः

## शिक्षाशास्त्रविभागीयवार्षिकशोधपत्रिका

## 2016



शिक्षाशास्त्रविभागः

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)

NAAC द्वारा A श्रेण्यां प्रमाणितः

(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)

क.जे.सोमैया-संस्कृतविद्यापीठम्

विद्याविहारः, मुम्बई

# शिक्षारश्मिः

## शिक्षाशास्त्रविभागीयवार्षिकशोधपत्रिका

**Departmental Annual Research Journal of Shiksha Shastra (Pedagogy)**

**2015-16**

हस्तन्यस्तसमस्तशास्त्रविभव ! प्रादान्न किन्ते फलं,
सर्पिर्दीपकवर्त्तिकाश्च विविधा नोद्दीपिताः किन्ततः ।
शास्त्रग्रन्थिगुरुत्वगर्वदमनः श्लाघ्यश्च सेव्यः सतां -
शिक्षारश्मिरतः सरेदपसरेच्चान्तस्तलीयन्तमः ॥


**संरक्षकः**

**प्रो. एम्. चन्द्रशेखरः**

**प्रधानसम्पादकः**

**प्रो. मदनमोहनझाः**

**सम्पादकः**

**डा. देवदत्तसरोदे**

**सहसम्पादकाः**

**डा. सो. ल. सीतारामशर्मा** **डा. कुमारः** **डा. सुनीलकुमारशर्मा**



**शिक्षाशास्त्रविभागः**

**राष्ट्रियसंस्कृतसंस्थानम्**

**मानितविश्वविद्यालयः**

**(मानवसंसाधनविकासमन्त्रालयभारतसर्वकाराधीनम्)**

**क. जे. सोमैयासंस्कृतविद्यापीठम्,**

**विद्याविहारः, मुम्बई**

**महाराष्ट्रम् -४०० ०७७**

# विषयानुक्रमणिका


| क्र.सं. | शीर्षकम् | लेखकः | पुटसंख्या |
|---|---|---|---|
| 1. | RESEARCH DESIGN (A Thought Content) | - Prof. M. Chandrashekhar | 01-03 |
| 2. | अवधानविस्तारः, तस्य मापनविधिः | - प्रो.मदनमोहनझा | 04-13 |
| 3. | अध्यापकेषु भाषाकौशलोन्नयनोपायाः | - डा.देवदत्तसरोदे | 14-19 |
| 4. | भूमण्डलीकरणं शिक्षा च | - डा.वी.एस्.वी.भास्कररेड्डी | 20-25 |
| 5. | विराडसि विष्णुरिवेह सरस्वती | - डा.आर्. जी. मुरली कृष्णः | 26-28 |
| 6. | योगशास्त्रानुसारं स्मृतिविचारः | - डा.सो.ल.सीतारामशर्मा | 29-31 |
| 7. | Importance of English Teaching in Traditional Teacher Training Colleges | - डा.कुमारः | 32-35 |
| 8. | Mental health in India and Services | - Shri. Shankar Baburao Aandhale | 36-41 |
| 9. | शिक्षा तकनीकी और संस्कृत अध्यापक की भूमिका | - डा.सुनीलकुमारशर्मा | 42-46 |
| 10. | समायोजन एवं रक्षाप्रतितन्त्र | - डा.आरतीशर्मा | 47-51 |
| 11. | छात्राणां भाषाकौशलोन्नयनोपायाः | - डा.बिचित्ररञ्जनपण्डा | 52-56 |
| 12 | संकृते पठनकौशलम् | - डा. इ. वेङ्कटेश्वर्लु | 57-62 |
| 13. | सामाजिकविज्ञानशिक्षणस्य शिक्षणप्रतिमानानि | - डा. प्रेमसिंहसिकरवारः | 63-66 |
| 14. | संस्कृताधिगमे कतिचनाधुनिकविधिप्रविधीनां प्रयोगः | - डा. बि.वेङ्कट लक्ष्मी नारायणः | 67-70 |
| 15. | संस्कृतशिक्षणस्य आधारः, दार्शनिकचिन्तनम् ; एका दृष्टिः | - डा. सुशान्तहोता | 71-75 |
| 16. | संस्कृतशिक्षकाय सशिक्षणाधिगमप्रक्रिया | - डा.सगरिकानन्द | 76-79 |
| 17 | Development of Personality and Health of Teachers Through Yoga | - DASARI RAGHURAM | 80-82 |
| 18. | दर्शनदृशा अध्यापकेषु व्यक्तित्वविकासोन्नयनम् | - प्रगतिदीक्षित | 83-87 |
| 19. | पञ्चतन्त्रे प्रतिपादितानि अध्यापकेषु सामाजिकतायाः विकासात्मकतत्त्वानि | - जी. उमानरसिंहमूर्तिः | 88-92 |
| 20. | समस्यासमाधानक्षमतोन्नयने मार्गदर्शनपरामर्शयोः व्यूहानाम् आवश्यकता | - आलपाटि.पवनकुमारः | 93-98 |
| 21. | अध्यापकेषु मानवमूल्याभिवर्धनम् | - गोविन्द सरकारः | 99-102 |
| 22. | अध्यापकानां व्यक्तित्वविकासः | - हेमन्तदत्तः | 103-105 |
| 23. | अभिव्यक्तिकौशलविकासे नवीनप्रवृत्तयः | - अमृता कौर | 106-108 |
| 24. | अध्यापकेषु मानवमूल्याभिवर्धनम् | - स्मिषा वी.डी | 109-113 |
| 25. | अध्यापकेषु व्यक्तित्वविकासः | - मृत्युञ्जयचक्रवर्त्ती | 114-118 |
| 26. | अध्यापकेषु मानवमूल्याभिवर्धनम् | - योगेन्द्रकुमारः | 119-122 |

# Importance of English Teaching in Traditional Teacher Training Colleges

✍ Dr. Kumar, Asst. Professor (Co...

[Language is the sound mode of communication and key stone of human development. In whole world there are many languages but the impact of a few languages is remarkable. Nowadays many countries are having a great deal with English language. Besides, Electronic media, Social media and Modern world are pervaded with this language. In the present essay, the author describes about the importance of English language in Traditional Teacher Training Colleges. He emphasizes on its indispensable features and uniqueness as an international language.]

**Introduction –**

English is an accepted international Language in this world. Many of the people speak English in several countries. But every country has own Language for communication purpose. English is used as administrative Language at government level in many countries Without any Language man couldn't share his feelings and opinions. Hence Language has become part of man's life. I would like to mention some points related English Language here as bellow:

- Language is the first instrument of man to convey his feelings.
- English is an European Language (Western) (Especially of England, USA and other countries )
- British conquered many countries and introduced English in their ruling countries.
- British came to India in 1600 AD and established their business forts here. Later they ruled over India and introduced English in its Education System.
- Now English is an accepted international language throughout the world.

**English as an International Language –**

English is an accepted international language in the world. Many of the people speak this language to communicate with others. Why because most of the people like this language. So following points written bellow can argue that English is an International Language. It is:

- Language par excellence.
- Language of cultural give and take.
- Link language.
- At the administrative level.
- Language of International trade, commerce and Industry.
- As the major window on the world.
- As the literary language.
- A rich, developed and beautiful language.

**SHODHA SAMIKSHA** ISSN : 2249-5045

[National Journal of Reserch in Education and Sanskrit]

**ŚODHA SAMĪKṢHĀ**

*Published by*

**RATHA SEVA PRATISTHANAM**

Sainkul, Keonjhar, Odisha, India, PIN - 758043

E-mail : sodhasamiksha74@gmail.com

sanatrath74@yahoo.co.in

Printed at :

MAA SARALA GRAPHICS

Suralata Bhawan, Bomikhal, Bhubaneswar - 10

Mob. +91-9437205533, Tel:(0674) 2585006

Rs.500/-

ISSN : 2249-5045

# SHODHA SAMIKSHA

# शोधसमीक्षा

[National Journal of Reserch in Education and Sanskrit]



Vol.VIII ISSUE-I January-June 2018

Peer Reviewed & Refereed Journal

www.shodhasamiksha.com

# पाठ्यचर्यायाः आधारभूतप्रतिमानम्

डा. जितेन्द्रकुमाररायगुरुः
अनुसन्धानाध्यापकः, शिक्षाशास्त्रविभागः
एकलव्यपरिसरः, अगरतला

**शोधसारः -**

शिक्षा विकासस्य प्रक्रिया वर्त्तते । अस्याः प्रारूपं पाठ्यचर्यास्वाधारितं भवति । पाठ्यचर्यायाः प्रमुखाः आधाराः व्यक्ति-समाज-दर्शन-विषयाश्च भवन्ति । सामाजिक-दार्शनिक-वैयक्तिकचिन्तनेषु सततं परिवर्तनं जायमानं दृश्यते । अतः शिक्षाऽपि परिवर्त्तनशीला वर्तते । परिवर्त्तनमेव विकासं जनयति । अतः शिक्षायाः सुविकासाय समुचितपाठ्यचर्यायाः विकासः सुतरां करणीयः। प्राचीनसमाजे पाठ्यचर्यायाः निर्माणस्य न कापि शैली असीत् । पाठ्यचर्यायाः निर्माणकार्यं विशेषतया विंशशताब्द्याः आरम्भात् एव प्रवर्तते । द्वितीयविश्वयुद्धस्यानन्तरं पाठ्यचर्याविकासेन साकं तस्याः नैकानि प्रतिमानानि विकसितानि सन्ति । प्रतिमानं नाम कस्यापि वस्तुनः क्रियायाः वा तादृशं प्राक्कल्पनात्मकं कार्यात्मकं वा स्वरूपं भवति, येन तस्य वास्तविकस्वरूपस्य बोधः जायते । पाठ्यचर्याप्रतिमानस्यार्थः पाठ्यचर्यायाः स्वरूपं भवति । वील्डमहोदयस्य Model परिभाषाधारेण कस्यापि आदर्शलक्ष्यप्राप्तये पाठ्यचर्यायाः स्वरूपस्य निर्धारणमथवा एतस्मै कार्याय दिशानिर्देशनस्य प्रक्रियायाः स्वरूपस्य निर्धारणं पाठ्यचर्याप्रतिमानमिति वक्तुं शक्यते । पाठ्यचर्याप्रतिमानस्य स्वरूपं शैक्षिकलक्ष्याधारितं भवति । समाज-समययोः परिवर्त्तनेन सह शिक्षायाः लक्ष्येष्वपि परिवर्त्तनं दृश्यते । अतः पाठ्यचर्याविकासस्य प्रतिमानमपि परिवर्त्तते । पाठ्यचर्यायाः बहूनि प्रतिमानानि सन्ति । तेषु आधारभूतप्रतिमानं विशिष्टं प्रतिमानं वर्त्तते । अमुं विषयमाधारीकृत्य ईषत् इहोपस्थाप्यते ।

**मुख्यशब्दाः -** प्रतिमानम्, आधारभूतप्रतिमानम्, ताबाप्रतिमानम् ।

**विषयप्रवेशः -**

प्रत्येकं विद्यालयस्य शिक्षणाधिगमप्रक्रियां सफलीकर्तुं शिक्षकस्य अतीव भूमिका वर्त्तते । सामान्यतः विद्यालयस्य पाठ्यचर्यापरिवर्तनस्य मुख्यघटकाः शिक्षक-विद्यालय-समुदायविशेषाश्च भवन्ति । सर्वेषु विद्यालयेषु पाठ्यचर्यायाः विकासः निम्नस्तरात् उच्चस्तरपर्यन्तं भवति । कस्यां पाठ्यचर्यायां परिवर्तनाय इदमावश्यकं यत् तत्रत्यः समाजस्य जनाः तं परिवर्तनमात्मसात्कृत्वा परिवर्तितपाठ्यचर्यामाध्यमेन तेषां सुतानां भविष्यं निर्माणं कुर्युः । अस्य प्रतिमानस्य निर्माणं, विकासः, उत्पत्तिश्च स्वस्मिन् पूर्णं भवति । प्रत्येकम् अध्यापकः अस्य प्रतिमानस्य प्रक्रियां क्रियान्वयनाय प्रयत्नं करोति । अस्मिन् प्रतिमाने अध्यापकाः, अभिभावकाः, छात्राः, विभिन्नसमुदायविशेषाश्च अन्तर्भवन्ति । ते यथावसरं प्रतिमानविषये, पाठ्यचर्यानिर्माणे, संशोधने च स्वाभिमतं प्रदातुं शक्नुवन्ति । निश्चप्रचमिदं वक्तुं शक्यते यत् प्रतिमानमिदं जनैः जनानां जनेभ्यः च भवति । एतदतिरिच्य अस्य प्रतिमानस्य प्रयोगं पाठ्यचर्यायाः समस्यानां समाधाने, विभिन्नसमुदायस्यावश्यकतानां सम्पूर्त्यै च भवति । अदः छात्रकेन्द्रितप्रतिमानं वर्त्तते । यद्यपि प्रतिमानमिदं छात्रकेन्द्रितं तथापि मुक्तप्रतिमानत्वेन स्वीकर्तुं शक्यते । अत्र सर्वे अध्यापकाः, छात्राः, अभिभावकाः च सम्भूय उपविश्य कार्यं कर्तुं शक्नुवन्ति । अस्य प्रतिमानस्य प्रतिपादकः हिल्दा ताबा महोदयः वर्त्तते । हिल्दा ताबा महाशयः पाठ्यचर्यायाः प्रारूपविकासे मूल्याङ्कनस्य महती भूमिका वर्त्तत इति स्वीकरोति । अत्र मूल्याङ्कनस्यार्थः शिक्षणायामः भवति । ब्लूममहोदयेन मूल्याङ्कनस्य यः अर्थः प्रदत्तः , सोऽपि अर्थः हिल्दा ताबामहोदयेन स्वीकृतः । तेन मूल्याङ्कनम् इत्थं परिभाषितम् – विद्यालये छात्राणां विकासाय, तेषां व्यवहारसम्बन्धितप्रभावान् एकत्रिकरणं प्रभावाणां मापनप्रक्रिया च भवति मूल्याङ्कनम् । अनेन स्वस्य व्यापकमूल्याङ्कनपाठ्यचर्याप्रतिमानस्य चत्वारि सोपानानि उल्लेखितानि । यथा –

1. **उद्देश्यानां निर्धारणम्** - अस्मिन् सोपाने शिक्षायाः उद्देश्यदृष्ट्या पाठ्यचर्यायाः मूल्याङ्कनं क्रियते । अत्र ज्ञानात्मक-भावात्मक-क्रियात्मक-सृजनात्मकोद्देश्यसंयुतप्रमाणान् एकत्रीकृत्य शैक्षिकोद्देश्यानां निर्धारणं क्रियते ।
2. **शिक्षणाधिगमक्रियाणां कृते प्रमाणम्** – अस्मिन् सोपाने शिक्षणविधि-प्रविधि-पाठ्यसामग्रीणां प्रयोगं कृत्वा अधिगमार्थं परिस्थितयः उत्पाद्यन्ते, अधिगमानुभवार्थं प्रमाणानि एकत्रीक्रियन्ते ।
3. **अधिगमप्रभाविघटकानां कृते प्रमाणम्** – शिक्षणे बहवः घटकाः सन्ति, ये अधिगमप्रक्रियां प्रभावयन्ति । तादृशानां घटकानां कृते प्रमाणानि एकत्रीक्रियन्ते ।

4. **उद्देश्यसम्बन्धितच्छात्राणां व्यवहाराय प्रमाणम्** – अन्तिमे सोपाने पाठ्यचर्यायाः सार्थकतायाः परीक्षणमुद्देश्यैः क्रियते। परीक्षणस्य स्वरूपम् उद्देश्यैः सह संयुक्तं भवति। अतः व्यवहारस्य परिवर्तनप्रमाणानि एकत्रीक्रियन्ते। एतैः प्रमाणैः पाठ्यचर्यायाः संशोधनं क्रियते।

हिल्दा तावामहोदयेन एतेषां सोपानाधारेण पाठ्यचर्यायाः प्रारूपाय तुरीयावस्था प्रोक्ता। इमाः अवस्थाः –

1. मूल्याङ्कनाय आवश्यकप्रदत्तानां स्वरूपस्य निर्धारणम्।
2. आवश्यकप्रक्रियायाः चयनं, तस्याः स्वरूपस्य निर्माणम्।
3. आवश्यकपरिवर्तनसंयुक्तप्राक्कल्पनाविकासाय प्रदत्तानां विश्लेषणम्।
4. प्राक्कल्पनां कार्यरूपेण परिवर्तनम्।

इत्थमस्मिन् प्रतिमाने अवस्थायाः सोपानस्य वा अनुसरणं कृत्वा प्रमाणस्याधारेषु पाठ्यचर्यायाः विकासः संशोधनञ्च क्रियते।

**आधारभूतप्रतिमानस्यार्थः -**

आधारभूतप्रतिमानस्यार्थः भवति शिक्षाप्रक्रियायां समागतानां विविधप्रकाराणां समस्यानां मुख्यं कारणं परिज्ञाय तस्यैव कारणस्य निराकरणम्। शिक्षा एका सततप्रक्रिया वर्तते। अस्यां प्रक्रियायां समस्याः दरीदृश्यन्ते। किन्तु एतासां समस्यानां समाधानाय अनेनैव प्रतिमानेन प्रयत्नः विधीयते। अनेन प्रतिमानेन समस्यायाः मूलकारणस्य परिभाषीकरणाय प्रयासः क्रियते। अदः प्रतिमानं समस्यायाः मूलतत्त्वस्यान्वेषणाय यत्नं करोति। किञ्च समस्यायाः मूलकारणस्य प्राक्कल्पनामपि करोति। अतः एनं प्रतिमानं Grass root Model इति कथ्यते। यदा अध्यापकः पाठ्यचर्यां अपूर्णेति अनुभवति, तदा अस्य प्रतिमानस्य विकासेन सहैव पाठ्यचर्यायाः विकासं करोति। प्रतिमानेऽस्मिन् प्रशासनस्य मुख्यकार्यं भवति अभिप्रेरणप्रदानम्। पाठ्यचर्यायाः परिवर्तनम् अध्यापकः वैयक्तिकरूपेण करोति। किञ्च यः पाठ्यचर्याप्रतिमानं निर्मीति सः अन्यान् अध्यापकान् कर्मण्यस्मिन् सम्मेलयितुं शक्नोति। पाठ्यचर्यासम्बन्धितनीतिनिर्धारणं विद्यालयेन प्रशासकीयजनैः वा कर्तुं शक्यते। अत्र सर्वकारस्य न किमपि योगदानं वर्तते। एतस्य प्रतिमानस्य विकासं तदा सम्भवति यदा अध्यापकेषु विद्यालयेषु वा तादृशी विशिष्टा योग्यता भवेत्। येन ते एनं प्रतिमानं व्यवस्थितरूपेण विकासयितुं शक्नुवन्ति। एतादृशी योग्यता तस्मिन् भवति यः अस्य प्रतिमानस्योपयोगं कृत्वा अग्रेसारयितुं शक्नोति। यद्यपि पाठ्यचर्याविकासे विचारो यं नवीनः वर्तते तथापि सिद्धान्तो यं प्राचीनः वर्तते। एतस्य प्रतिमानस्य विकासः हिल्दा तावामहोदयेन कृतः। एतत् प्रतिमानं प्रमुखरूपेण अध्यापकस्य भूमिकां स्वीकरोति, न तु अन्येषामिति प्रमुखः दोषः वर्तते एतस्य प्रतिमानस्य।

**तावाप्रतिमानम् –**

अस्य मतानुसारं ये पाठ्यचर्यायाः प्रयोगं कुर्वन्ति त एव पाठ्यचर्यायाः अभिकल्पनं कुर्वन्ति। अध्यापकः स्वीयच्छात्रेभ्यः शिक्षणाधिगमसामग्रीणां निर्माणं कुर्यात्। निगमनात्मकोपागमस्य स्थाने आगमनात्मकोपागममाध्यमेन विशिष्टात् सामान्यस्य प्रयोगं कृत्वा सामान्यपाठ्यचर्यायाः प्रारूपं निर्माणं कर्तव्यम्। हिल्दा तावा महोदयेन स्वीयपाठ्यचर्यायोजनायाः आधारभूतप्रतिमानस्य सप्त सोपानानि निर्दिष्टानि। इमानि सोपानानि यथा –

- आवश्यकतायाः निर्धारणम्
- उद्देश्यानां निर्माणम्
- विषयवस्तूनां चयनम्
- विषयवस्तूनां सङ्गठनम्
- अधिगमानुभवानां चयनम्
- शिक्षणानुभवानां सङ्गठनम्
- मूल्याङ्कनञ्चेति।

**आधारभूतप्रतिमानस्य गुणाः –**

- विशिष्टसमस्यायाः समाधानम्
- राष्ट्रियावश्यकतायाः महत्त्वम्

- ➢ व्यापकप्रतिमानम्
- ➢ शैक्षिकप्रक्रियायां साहाय्यप्रदानम्
- ➢ स्थानीयपरिस्थितीनां महत्वम्
- ➢ छात्रकेन्द्रितप्रतिमानम्
- ➢ सुपरिणामप्रदानम्
- ➢ अध्यापकाः सारल्येन स्वीकुर्वन्ति
- ➢ प्राविधिकदृष्टिकोणाधारितप्रतिमानम्

**आधारभूतप्रतिमानस्योपयोगः –**

अध्यापकेन आधारभूतप्रतिमानस्य कक्षायामोपयोगः इत्थं क्रियते -

- तावामहोदयः विश्वसति यत् कक्षायां छात्रेभ्यः यः शिक्षां प्रददाति , सः पाठ्यचर्यायाः विकासस्योत्तरदायित्वं स्वीकुर्यात्।
- अध्यापकः छात्राणां विकासाय एकेन मुख्यान्वितिना शिक्षणाधिगमप्रक्रियां चालयति, सा प्रक्रिया निम्नस्तरात् आरभते।
- आधारभूतप्रतिमाने अध्यापकः आगमनविधेः उपयोगं करोति, येन पाठ्यचर्यायाः विकासः समुचितरूपेण भवति।
- आधारभूतप्रतिमाने अध्यापकस्य विशिष्टं महत्त्वं वर्तते। यतो हि पाठ्यचर्यायाः विकासे तस्य महत्त्वपूर्णा भूमिका भवति।
- पाठ्यचर्याविकासप्रक्रियायाम् अध्यापकस्य नवज्ञानेन अनुभवेन च पाठ्यचर्या नवीनां दशां प्राप्नोति।
- आधारभूतप्रतिमानम् अध्यापकं ज्ञान-सूचनयोः मुख्यकारणं मनुते। यस्य पाठ्यचर्यायाः विकासे पूर्णं नियन्त्रणं भवति।
- अध्यापकः अधिगमोद्देश्यानां प्राप्तये निर्णयस्वीकरणे स्वतन्त्रः भवति । सः छात्रान् विभिन्नेषु विभागेषु विभज्य अधिगमाय सन्नद्धं करोति ।
- अध्यापकः विद्यालये क्रियाणामायोजनं, योजनायाः क्रियान्वयनं च कर्तुं स्वतन्त्रः भवति।

तावामहोदयस्यानुसारम् आधारभूतप्रतिमानस्योपयोगं विभिन्नैः विषयैः साकं पाठ्यचर्यायाः विभिन्नान् प्रकारान् सम्मील्य कर्तुं शक्यते। अस्य प्रतिमानस्योपयोगं प्राथमिकशिक्षातः माध्यमिकशिक्षापर्यन्तं कर्तुं शक्यते।

एवं प्रतिमानं संगठनं कृत्वा उद्देश्य- शिक्षणपद्धति- अधिगमानुभव – विषयवस्तु – मूल्याङ्कनैः पञ्चतत्त्वैः संयोज्यते । शिक्षणाधिगमप्रणाल्याः मुख्यमुद्देश्यं पाठ्यचर्या केन्द्रबिन्दुत्वेन निर्धारणं कृत्वा छात्रेषु प्रयोगं कर्तुं शक्यते । अस्मिन् अधिगमानुभवान् परिज्ञाय वास्तविकस्वरूपेण सह संयोजनीयम् । अत्र प्रत्यक्षानुभवान् विषयवस्तुना सह योज्यते । शिक्षणप्रक्रियायाः तदा विकासः भवति, यदा उद्देश्य- विषयवस्तु- अधिगमानुभवानां परिज्ञाय अध्यापकेन संगठनं क्रियते । अध्यापकस्य छात्रैः सह प्रत्यक्षसम्बन्धः भवति, न तु पाठ्यचर्यानिर्मातृः । अतः अध्यापकः स्वयं पाठ्यचर्याविकासस्योत्तरदायित्वं स्वीकुर्यात् । अध्यापकः सूचनां विकासयितुं नियन्त्रयितुं च शक्नोति । विद्यालये क्रियाणामायोजनं कृत्वा छात्रान् भाविकार्यार्थं सन्नद्धं करोति। पाठ्यचर्याविकासप्रक्रियाम् अध्यापकः सामुख्यस्तराधारेण प्रयोक्तुं शक्नोति –

1. आवश्यकतायाः निदानम्
2. उद्देश्यानां निर्माणम्
3. विषयसामग्रीणां चयनम्
4. विषयसामग्रीणां सङ्गठनम्
5. अधिगमानुभवानां चयनम्
6. अधिगमगतिविधीनां सङ्गठनम्
7. मूल्याङ्कनं तस्य विधयश्च।

प्रत्येकं विद्यालयाय आधारभूतप्रतिमानस्यावश्यकता वर्त्तते । यदि अस्य प्रतिमानस्य प्रक्रियाया: कार्यं पूर्णरूपेण कर्तुं शक्यते, तर्हि न केवलं छात्राणामावश्यकताया: सम्पूर्त्यै सक्षम: , अपितु अध्यापक- अभिभावक- समुदायविशेषाणामपि आवश्यकताया: पूर्त्यै सक्षम: भवति । किञ्च एतेन तेषां समस्यानां समाधानमपि भवति । प्रतिमानमिदं विद्यालयस्य शैक्षणिकोपलब्धिं संवर्द्धनं कृत्वा विद्यालयस्य गुणवत्तां समेधयति ।

**ग्रन्थाग्रणम् –**


1. पूनम मदान, पाठ्यक्रम विकास एवं आंकलन, अग्रवाल प्रकाशन, आगरा, 2017.
2. यादव, एस. पाठ्यचर्या विकास, श्रीविनोद पुस्तक मन्दिर, आगरा, 2010.
3. पाठ्यचर्या एवं अनुदेशन, इन्दिरा गाँधी राष्ट्रीय मुक्त विश्वविद्यालय, 2008
4. Agrawal, J.C. Curriculum reforms in India, New Delhi, 1990
5. http://www.ncdc.go.ug
6. http://www.undp.org
7. http://www.uwsp.edu